A.C. Joshi Library
P.U., Chandigarh

MSS No. 728 Subject Mahakavya

Name of MSS Raghuvansh Tika

Author Kalidasa

Period ______ Folios 385

Script Devnagiri Source Prof. M. Rakesh, D.A.V. College Jalandhar

Missing Folios ______

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

728

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

Form 13.

PANJAB
UNIVERSITY
LIBRARY

Class No..............................

Author No............................

Sans. MS. 851		
R142		रघुवंश, कृत कालिदास, ;
728-MS.		मल्लिनाथीय व्या० सहित ॥
		१६७ पत्रक ॥ ल० म० ११ पं० प्र० पृ०
		ह० लि०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह. ग्रं०
728

PANJAB UNIVERSITY LIBRARY

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. १ 128

उँश्रीगणेशायनमः मातापितृभ्यांजगतोनमोवामार्धजानये सद्योदक्षिणदृक्पातसंकु
चद्वामदृष्टये १ अंतरायतिमिरोपशांतये शांतपावनमचिंत्यवैभवम् तंनरंवपुषिकुं
जरंमुखेमन्महेकिमपितुंदिलंमहः २ शरणंकरवाणिशर्मदंतेचरणंवाणिचराचरोप
जीव्यम् करुणामसृणैःकटाक्षपातैःकुरुमामंबकृतार्थसार्थवाहं ३ वाणींकाण
भुजीमजीगणदवासासीच्चवैयासिकीमंतस्तंत्रमरंस्तपन्नगगवीगुम्फेषुचाजागरी
त् वाचामाचकलद्रहस्यमखिलंयश्चाक्षपादस्फुरां लोकेभूद्यदुपज्ञमेवविदुषांसौ
जन्यजन्यंयशः ४ मल्लिनाथकविःसोयंमंदात्मानुजिघृक्षया व्याचष्टेकालिदासी
यंकाव्यत्रयमनाकुलं ५ कालिदासगिरांसारंकालिदासःसरस्वती चतुर्मुखोथवा
साक्षाद्विदुर्नान्येतुमादृशाः ६ तथापिदक्षिणावर्तनाथाद्यैःक्षुण्णवर्त्मसु व
यंचकालिदासोक्तिष्ववकाशंलभेमहि ७ भारतीकालिदासस्यदुर्व्याख्याविष
मूर्छिताएषासंजीविनीटीकातामद्योज्जीवयिष्यति ८

१

इहान्वयमुखेनैव सर्वं व्याख्यायते मया नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ४ इह खलु सक
लकविशिरोमणिः कालिदासः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः प
रनिर्वृतये कान्तासम्मिततयोपदेशयुजे इत्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रे
यःसाधनतां काव्यालापांश्च वर्जयेदित्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् र
घुवंशाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफ
लसाधनभूतविशिष्टेष्टदेवतानमस्कारस्य विशिष्टाचारपरिप्राप्तत्वादाशीर्नमस्क्रियावस्तुनिर्दे
शो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात्काव्यनिर्माणस्य विशिष्टशब्दा
र्थप्रतिपत्तिमूलत्वेन विशिष्टशब्दार्थयोश्च शब्दजालमशेषं तु धत्ते सर्वस्य वल्लभा अर्थ्यं रूपं य
दखिलं धत्ते मुग्धेन्दुशेखरः इति वायुपुराणसंहितावचनबलेन पार्वतीपरमेश्वरायत्तत्वदर्शनात्त
त्प्रतिपित्सया तावेवाभिवादयते वागर्थाविति वागर्थाविवेत्येकं पदं इवेन सह नित्यसमासो
विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यं एवमन्यत्रापि द्रष्टव्यं वागर्थाविव शब्दार्थावि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तात

3

र.टी.
२

वसंपृक्तौनित्यसंबद्धावित्यर्थः नित्यसंबद्धयोरुपमानत्वेनोपादानान्नित्यः शब्दार्थसंबंध इति
मीमांसकाः जगतो लोकस्य पितरौ माता च पिता च पितरौ पितामात्रेति द्वंद्वैकशेषः मतापि
त्रोः पितरौ मातरपितरौ वं जनपि स्यावित्यमरः एतेन शर्वशिवयोः सर्वजगज्जनकतया
वैशिष्ट्यमिष्टार्थश्रुतानशक्तिपरमकारुणिकत्वं च सूच्यते पर्वतस्यापत्यं स्त्री पार्वती तस्याप
त्यमणप्रत्ययः टिड्ढेति ङीप् पार्वती च परमेश्वरश्च तौ पार्वतीपरमेश्वरौ परमशब्दः सर्वोत्तम
डैवागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वंदे पार्वतीपरमेश्वरौ १॥
त्वद्योतनार्थः मतान्तरस्यार्द्धिमत्वादल्पाक्षरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः वागर्थप्रतिपत्तये
शब्दार्थयोः सम्यक्ज्ञानार्थं वंदे अभिवादये अत्रोपमालंकारः स्फुटएवनयोक्तस्तनः
सिद्धेनभिन्नेन सम्मतेन च धर्मतः साम्यमन्येन वर्ण्यस्य वाच्यं वदेकदोषमामितिश्रापिकस्वय
मलंकारः कालिदासोक्तकाव्यादौ भद्रेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभः सूच्यते त
दुक्तं शुभदो मो भूमिदेवत इति च कारस्यान्तर्वाजत्वात्त्रयाणां सिद्धिः १ २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ते प्रणिकविः साहंकारः परिहरति क्वसूर्येत्यादिश्लोकद्वयेन प्रभवत्यस्मादिति प्रभवः कारणमुत्पत्तिस्था
नं वा कर्तरि वकारके संज्ञायामिति साधुः सूर्यः प्रभवो यस्य स सूर्यप्रभवः वंशः क्व अल्पो विषयो ज्ञे
यो यस्याः सा अल्पविषया मतिः प्रज्ञा क्व द्वौ क्व शब्दौ महदंतरं सूचयतः सूर्यवंशं ज्ञातुं न प्रभविष्णुर्न शक्नो
मीत्यर्थः तथा च तद्विषयप्रबंधनिरूपणं न दूरापास्तमिति भावः तथाहि दुस्तरं दुःखेन तरितुं

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् २

रितुमशक्यं तरितुमिच्छुः तृषितत्यादिना खल्प्रत्ययः सागराणां संबंधी सागरः तं समुद्रं सागरं मोहादज्ञा
नादुडुपेन प्लवेन उडुपं तु प्लवः कोलः इत्यमरः अथवा चर्मावनद्धेन पात्रेण
चर्मावनद्धमुडुपं प्लवं काष्ठं करंडवदिति सज्जनः तितीर्षुस्तरितुमिच्छुरस्मि भवामि तरतेः सन्नं
तादुप्रत्ययः अल्पसाधनैरधिकारंभो न सुकर इत्यभिप्रायः इदं च वंशोत्कर्षकथनं स्वप्रबंधमहत्त्वा
र्थमेव तदुक्तं प्रतिपाद्यमहिम्ना च प्रबंधो याति महत्तरं इति लक्षणात् २ ॥

.टी.
मू

प्रशाकार्थे प्रहात्निमाह मंदइति किंच मंदो मूढः मूढाल्पापटुनिर्भाग्यमंदाइत्यमरः तथापि
कवियशःप्रार्थी कवीनां यशः काव्यनिर्माणजातेनत्प्रार्थनीयशीलोहं प्रांशुनाउन्नतपुरु

मंदः कवियशःप्रार्थी गमिष्याम्युपहास्यतां
प्रांशुलभ्ये फले मोहादुद्बा
हुरिव वामनः ३ ।

षेण लभ्ये प्राप्ये फले फलविषये मोहाल्लोभादुद्बाहुः फलग्रहणायोच्छ्रितहस्तो वा
मनो ह्रस्व इव खर्वो ह्रस्वश्च वामन इत्यमरः उपहास्यतामुपहासविषयतां लोकैरपि
निरायमस्मदयः गमिष्यामि प्राप्स्यामि ३ ॥ ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कु २ 6 8

मेदस्त्रेनाहिमस्तनामयमनुयोगउन्ततस्याह प्रथवेति प्रथवाफलोनरेसेवैः नरिस्मिः कविच्छेन ततहस्व
कादिहतिभिः हानवाह्वारेकुनेनानाघलादिश्वेथन्नुपायावासेवह्रोराश्वेशाघसमाकाम
न् घालैनान्त्रथ्यश्वमवेवशेऊलनन्मनेकलवेणः सनानोवेशः वेत्रेणमणोवेथफस्त्वावितलम

प्रथवाकुनवारह्वारैवेशोऽसौनन्तर्वनतिभिः मलो
वत्रतनन्कोलैंतत्रवेसवोलिमेगानेः ४

विशेषेणवचेनसोऊ लिणशहवोर्मणिवेधेरतमेरउनिकेशवः समनुकोर्याततनकारदं
रत्वेतत्वसेवनेगानेः संचारोसिवर्णवीयरत्रवंवोममवाकुप्रसावोःसौम्यथः घ
धप्रवेशात्तदणानां प्रनीजानीते ४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सोऽहमित्यादिभिः पंचभिः श्लोकैः कुलकेनाह द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिस्सरः तथापि
क कालापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतं । सोऽहं रघूणामन्वयं वक्ष्ये इत्युत्तरेणान्वयः तनुगुरु
विधानां रघूणामित्यत्रोक्तानां विशेषणानि योजयति. आजन्मनः जन्मन आ
ङ्ः मर्यादाभिविध्योरित्यभिविधावव्ययीभावः तच्च शुद्धानां सहसुपेति समासः

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणां आस
मुद्रक्षितीशानामानाकरथवर्त्मनां ५

त्रापि द्रष्टव्यं आजन्मशुद्धानां निषेकादिसर्वसंस्कारसंपन्नानामित्यर्थः आफलोदयं
फलोदयसिद्धेः कर्म येषां ते तथोक्तास्तेषामारब्धान्तगामिनामित्यर्थः आनाकरथवर्त्म येषां
तेषां इन्द्रसहचारिणामित्यर्थः । अत्र सर्वत्र आङोऽभिविध्यर्थत्वं द्रष्टव्यं अन्यथा मर्यादार्थ
त्वे जन्मादिशुद्ध्यभावप्रसंगात् ५

यथाविधीति विधिमनतिक्रम्य यथाविधि: यथासादृश्य इत्यव्ययीभावः तथाहुतशब्देन सह सु
पेति समासः एवं यथाकामार्चितेत्यादीनामपि द्रष्टव्यं यथाविधिहुताग्नयो येषां तेषां यथाकाम
मभिलाषमनतिक्रम्य अर्चितार्थिनो यथापराधमपराधमनतिक्रम्य दंडो येषां तेषां यथाकालप्र

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां
यथापराधदंडानां यथाकालप्रबोधिनां ६

बोधिनां कालमनतिक्रम्य प्रबोधशीलानां चतुर्भिर्विशेषणैर्हवनार्थिजनार्थिसत्कारदं
डधरत्वप्रजापालनसमयजागरूकत्वादीनि
विवक्षितानि ६ ॥

र.टी.
५

त्यागायेति त्यागाय दानाय त्यागो विहापितं दानमित्यमरः सत्पात्रे विनियोगस्त्यागस्तस्मै संभृ
तार्थानां संचितधनानां न तु व्यापाराय सत्याय मितभाषिणां मितभाषणशीलानां न तु प
राभवाय यशसे विजिगीषूणां जेतुमिच्छूनां न तु अर्थसंग्रहाय प्रजायै गृहमेधिनां
दारपरिग्रहणां न तु कामोपभोगाय प्रत्येकं त्यागायेत्यादिषु चतुर्थी तदर्थेत्यादिना तादर्थ्ये चतु

त्यागाय संभृतार्थानां सत्याय मितभाषिणां
यशसे विजिगीषूणां प्रजायै गृहमेधिनां ७

र्थीसमासविधानात्तादर्थ्यकाव्रतर्थी गृहैर्दारैर्मेधन्ते संगच्छन्त इति गृहमेधिनः दारेष्वपि गृहाः
इत्यमरः जायाया गृहा इति हलायुधः मेधृ संगमे इति धातोर्णिनिः एभिर्विशेषणैः परो
पकारित्वं सत्यवचनत्वं यशःपरत्वं पितृणां मातृणां शुद्धता चाविवक्षितानि ७ ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शैशवमिति शिशोर्भावः शैशवं बाल्ये शिशुत्वं शैशवं बाल्यमित्यमरः प्राणभृज्जातिवयोवचनो
द्गात्रादिभ्योऽञ् इत्यञ्प्रत्ययः तस्मिन्वयसि अभ्यस्तविद्यानां एतेन ब्रह्मचर्याश्रमो विवक्षितः यु
नो भावः यौवनं तारुण्यं यौवनसमामित्यमरः युवादित्वादण्प्रत्ययः तस्मिन्वयसि तारु
ण्ये विषयैषिणां भोगाभिलाषिणां एतेन गृहस्थाश्रमो विवक्षितः वृद्धस्य भावो वार्द्धकं वृ

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणां वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजां ८

द्धत्वे द्वन्द्वमनोज्ञादिभ्यश्चेति वुञ् वार्द्धके वृद्धसंघाते वृद्धत्वे वृद्धकर्मणीति विश्वः संज्ञा
नार्थेन वृद्धशब्दात् वुञ् इति वक्तव्यत्वात्स्वार्थिको वुञ् तस्मिन्वार्द्धके वयसि मुनीनां वृत्तिरि
व वृत्तिर्येषां तेषां एतेन वानप्रस्थाश्रमो विवक्षितः अन्ते शरीरत्यागकाले योगेन परमात्म
ध्यानेन योगः संहननोपायध्यानसंगतियुक्तिष्वित्यमरः तनुं त्यजन्तीति तनुत्यजः अन्ये
भ्योऽपि दृश्यत इति क्विप् एतेषां देहत्यागिनां एतेन मोक्षभावो विवक्षितः ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र. टी.
६

॥

रघूणामिति सोहं लब्धप्रवेशोतनुवाग्विभवोपिअल्पवाणीप्रसारोपि सन्नतेषांगुणैस्तैस्तद्गुणैः आ
जन्मशुद्ध्यादिभिः कर्तृभिः कर्णं मम श्रोत्रमागत्य चापलाय एवं वादित्वात् कर्मणः चापलं चा
पलकर्म अविमृश्यकरणरूपकं कर्तुं क्रियार्थोपपदेत्यादिना चतुर्थी प्रचोदितः सन्प्रेरि
तः सन्रघूणामन्वयं अन्वयविषयप्रबंधं वक्ष्ये ९ कुलकं सेप्रति स्वप्रतिबंधपरीक्षार्थं सं

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन् तद्गुणैः कर्णमागत्य चा
पलाय प्रचोदितः ९ कुलकं तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेत
वः हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा १०

तः प्रार्थयते तमिति तं रघुवंशाख्यं प्रबंधं सदसतोः गुणदोषयोः व्यक्तेर्हेतवः कर्त्तारः संतः
संतः श्रोतुमर्हंति तथाहि हेम्नो विशुद्धिर्निर्दोषत्वं रूपं श्यामिकापि लोहांतरसंसर्गादिदोषो
वा अग्नौ संलक्ष्यते नान्यत्र तद्वदत्रापि संत एव गुणदोषविवेककारिणो नान्य इति भावः १०

६

क१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वर्ण्यं वस्तु प्रतिपादयति वैवस्वत इति मनस्तत्त्वमीषिणो मनीषिणः धीराः विद्वांस इति यावत्
पोदशादित्वसाधुः तेषां माननीयः पूज्यः छन्दसां वेदानां छन्दः पद्ये च वेदे चेति विश्वः प्र
णव ॐकार इव महीक्षितां पतिरीशाने महीक्षितः क्षितीश्वराः क्षितिपास्तेषामैश्वर्यवत्त्वात् किंच
त्वगमश्च तेषामाद्यः प्रादिभूतः ॐकारः प्रणवो यस्मादित्यमरः विवस्वतः सूर्यस्याप

वैवस्वतो मनुर्नाम माननीयो मनीषिणां आसीन्महीक्षितामाद्यः प्रणवः छन्दसामिव ॥ ११ ॥ तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव १२

त्यं पुमान् वैवस्वतो नाम वैवस्वत इति प्रसिद्धो मनुरासीत् ॥ तदन्वय इति शुद्धिरस्या
स्तीति शुद्धिमांस्तस्मिन् शुद्धिमति निर्दोषे वंशे तदन्वये तस्य मनोरन्वये कुले अन्वेवायो
ऽन्वयो वंशो गोत्रं चाभिजनं कुलमिति निरुक्तात् प्रसूतः अतिशयेन शुद्धिमान् शुद्धिमत्तरः
द्विवचनविभज्योपपदे तरबीयसुनौ तस्य दिलीप इति प्रसिद्धो राजश्रेष्ठो राजेन्दुः राजश्रेष्ठः

उपमितं व्याघ्रादिना समासः क्षीरनिधाविव समस्तः
ज्ञातः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र॰टी॰ १ 13

सदेत्यादिभिस्त्रिभिः श्लोकैः दिलीपं विशिनष्टि व्यूढेति व्यूढं विपुलं उरो यस्य स व्यूढोरस्कः उरःप्रभृतिभ्यः
कप् व्यूढं विपुलं भद्रं स्कन्धांसमेव शिरश्चेति यादवः वृषस्य स्कन्ध इव स्कन्धो यस्य स तथा सत्र
स्तुपमानेनासादित्वादुत्तरपदलोपी बहुव्रीहिः शालवृक्षवत्प्रांशुरुन्नतः शालप्रांशुः प्रा
कारवृक्षयोः शालः शालः सर्जतरुः स्मृत इति यादवः महान्तौ भुजौ यस्य स महाभुजः आत्मक
र्मक्षमं स्वव्यापारानुरूपं देहं समाश्रितः प्राप्तः क्षात्रः क्षत्रसम्बन्धी धर्म इव स्थितः मूर्तिमा

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः १३

सारो बले दृढांशे वेति यादवः २

सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना १४

नराक्रम इव स्थितस्त्वमेवेत्या १३ सर्वातिरिक्तेति सर्वातिरिक्तसारेण सर्वेभ्यो भूतेभ्योऽधि
कबलेन सर्वाणि भूतानि तेजसा अभिभवतीति सर्वतेजोभिभावी तेन सर्वेभ्य उन्नतेनो
त्कृष्टेनात्मना शरीरेण आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति विश्वप्रकाशः मेरुरि
व उर्वीं क्रान्त्वा आक्रम्य स्थितः मेरावपि विशेषणानि तुल्यानि अत्राभिश्व तु रत्नानामाभामि
निर्मितोऽन्वयः तस्मादभिभवत्ययं सर्वभूतानि तेजसेति मनुवचनानुरोधात् सर्वतेजोभिभाविते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आकारेति आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः प्रज्ञया सदृश आगमः प्रज्ञानुरूपं शास्त्रपरि
श्रमः आगमैः सदृशः आरंभः कर्म यस्य सः तथोक्तः आरभ्यत इति आरंभः कर्म तस्य सदृ
शः उदयः फलोदयः फलसिद्धिर्यस्य स तथोक्तः १५ भीमेति भीमैः कांतैश्च नृपगु

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारंभः आरंभसदृशोदयः १५
भीमकांतैर्नृपगुणैः स बभूवोपजीविनां अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः

णै राजगुणैः तेजः प्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च सहितो नृपः उपजीवि
नां आश्रितानां यादोभिर्जलग्राहैः यादांसि जलजंतव इत्यमरः रत्नैश्चार्णव इवाधृ
ष्यः अनभिभवनीयश्च अभिगम्यश्च आश्रयणीयश्च बभूव १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
८

15

रेखामात्रमिति नियंतुः रक्षकस्य सारथेश्च तस्य दिलीपस्य संबंधिन्यः नेमीनां चक्रधाराणां वृ
त्तिरिव वृत्तिर्व्यापारो यासां ताः चक्रधाराप्रधिर्नेमिरिति यादवः चक्रं रथांगं तस्यांते नेमिः
स्त्रीस्यात्प्रधिः पुमानित्यमरः प्रजाः आमनोः मनुमारभ्येत्यभिविधिः पदद्वयं चैतत् समासा

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं। न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः॥ १७

स्य विभाषितत्वात् तस्मादारभ्य[illegible] क्षुण्णाद्वर्त्मनः आचारपद्धतेरयनस्य परमधिक
मित्यर्थः रेखाप्रमाणमपीति रेखामात्रं रेखाप्रमाणमीषदपीत्यर्थः प्रमाणे द्वयसजित्या
दिना मात्रच्प्रत्ययः परशब्दविशेषणं चैतत् न व्यतीयुः नातिक्रांतवत्यः कुशलसारथि
प्रेषिता रथनेमय इव तस्य प्रजाः एवं तस्य मार्गं न जहुरित्यर्थः १७ ॥

८

प्रजानामिति स राजा प्रजानां भूत्यै भूत्यर्थं वृद्ध्यर्थमेव अर्थेन सह नित्यसमासः सर्वलिंगता च वक्त
व्या ग्रहणक्रियाविशेषणं चैतत् ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करं अग्रहीत् भागधे

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः १८

यः करो बलिरिति अमरः तथा हि रविः सहस्रगुणं पश्चिमकर्मणि तद्यथा तथा सहस्रगुणमुत्स्र
ष्टुं दातुम् उत्सर्जनक्रियाविशेषणं चैतत् रसमम्बु आदत्ते गृह्णाति रसो गंधे रसे स्वादे क्तो
तिदौ विषरागयोः शृंगारादौ द्रवे वीर्ये देहधातौ तुषारदउ इति विश्वः १८ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

17

र॰टी॰
८

तेष्वपि तु बुद्धिसौर्यसंपन्नस्य जनसार्थसाधनेष्व परानपेक्षत्वमाह सेनेति तस्य राज्ञः सेना चतुरंग
बलं परिच्छाद्यतेऽनेनेति परिच्छद उपकरणं बभूव छत्रचामरादिवत्तस्य न भूदित्यर्थः । पुंसि संज्ञा
यां घः प्रायेणेति घः प्रत्ययः छादेर्घेऽद्व्युपसर्गस्येति उपधाह्रस्वः अर्थस्य प्रयोजनस्य साधने तु द्व

सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनं शास्त्रे
ष्वव्याहता बुद्धिर्मौर्वी धनुषि चातता १९

यमेव शास्त्रेष्वकुंठिता अव्याहता बुद्धिर्याहुर्नेमपि पाठः धनुषि आतता आरोपिता मौर्वी
च ज्या च मौर्वी ज्या शिंजिनी गुण इत्यमरः नीतिपुरःसरमेवास्य शौर्यमभूदित्यर्थः १९ ९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

राज्यमूलत्वं मंत्रसंरक्षणेन साफल्यमाह तस्येति संवृतमंत्रस्य गुप्तविचारस्य वेदभेदे गुप्तवादे
मंत्रस्त्यमरः शोकहर्षादिजन्यो भ्रुकुटीमुखरागादिर्विकार आकारः इंगितं चेष्टितं हृदयगतवि
मा कारो वा इंगितं हृद्गतो भावो बहिराकार आकृतिरिति सज्जनः गूढे आकारेंगिते यस्य स्वभावचा
पलादिप्रयुक्तैर्मुखरागादिलिंगैर्वा अलक्षितो गाम्भीर्यमंत्रस्य तस्य राज्ञः प्रारम्भा इति

३ तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च फलानुमे
याः प्रारंभाः संस्काराः प्राक्तना इव २० ॥

प्रारंभाः सामाद्युपायप्रयोगाः फलितस्य कार्येण सर्वजन्मान्तरेणैव तत्र भवाः प्राक्तनाः सायंचि
रेत्यादिना ट्युल्तुटौ अन्ययोनयोपात्तद्दच संस्काराः पूर्वकर्मवासनाः इव फलेन कार्येणानु
मेयाः अनुमातुं योग्याः आसन् यथा यत्र वलन्त्यः तत्र मलेयुतनो राज्ञमनमंत्रं स्वरूपं इति
तन्न कुर्यात् यथा तत्रविदुः कर्मणा मा फलोदयादिति २० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

19

संप्रतिस्वामात्मगुणानामिति वाक्यम्मरणादिकं कृतवानित्याह जुगोपेति अत्रस्तो अभीतः स
र.टी. त्रातोपाधिं न तरेणैव त्रिवर्गसिद्धेः प्रथमं साधनत्वादेवात्मानं शरीरं जुगोप ररक्ष रक्षितवानित्य
१ र्थः अ

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः अगृध्नु
राददे सोर्थानसक्तः सुखमन्वभूत् २१

नातुरो अप्रहरणोपवृधं मे स्वकृते भेजे अर्जितवानित्यर्थः अगृध्नुरगर्धनशील एव
सन्नर्थानाददे स्वीकृतवान् असक्तः विषयेष्वासक्तिरहितः सन् सुखमन्व १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परस्परविरुद्धानामपिगुणानांतत्वसाहचर्यमासीदित्याह ज्ञानइति ज्ञानेपरवृत्तान्तज्ञानेस 20

त्यपिमौनंवाक् नियमनम् यथाहकामन्दकः नान्योपतापिवचनंमौनंव्रतंचरित्वनेनिश

तोश्रुतिकारसामर्थ्येपिक्षमाप्रकारतहनम् भवत्याणरवम्: शक्तानांभूषणंक्षमेतिसा

गेवितरणेसति त्यागोविहापितदानमुत्सर्जनविसर्जनेति वितरणंवितरणंसंग

ज्ञानेमौनंक्षमाशक्तौत्यागेश्लाघाविपर्ययः। गुणागुणा
नुबंधित्वात्तस्यसप्रसवाइव २२

नेप्रतिपादानमित्यमरः श्लाघा: विकत्थनंतस्याविपर्ययोभावः स्वश्लाघमत्रः नरतापर
रकीर्तनेपरिहितेत्यन्नस्यगुणाज्ञानादयः गुणैर्विहहैमौनादिभिस्तुनुबंधित्वात्सहचारित्वात्स
हप्रसवोजन्मयेषांतेषांसप्रसवाः सोदराइवाभवन् विरुद्धाअपिगुणास्तस्मिन्नवि
रोधेनैवावस्थिताइत्यर्थः २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्विविधं वृद्धत्वं ज्ञानतो वयसा च तत्र ज्ञानेन तस्य वृद्धत्वमाह अनाकृष्टस्येति विषयैः शब्दादिभिरनाकृष्ट
स्यावशीकृतस्य विद्यानां वेदवेदांगानां पारदृश्वनः परमन्तं दृष्टवतः दृशेः क्वनिप् धर्मे रतिर्यस्य तस्य आ
सक्तो जरसा जरया जरसोऽन्यतरस्यामिति जरसादेशः वृद्धत्वं वार्द्धकमासीत् तस्य ज्ञानोऽपि विषयवै
राग्यादिज्ञानफलसंपन्नत्वात् ज्ञानतो वृद्धत्वमासीदित्यर्थः नापलक्षणविपर्ययवृद्धत्वमिति कृत्वा अनाकृ
ष्टस्येत्यादिना विशेषणत्रयेण वैराग्यज्ञानशीलवृद्धत्वान्युक्तानीत्यवोचत् २२ प्रजानामि

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३ प्रजानां वि ग
नयाधानाद्रक्षणाद्भरणादपि स पिता पितरस्तासां केवलं जन्महेतवः २४

ति प्रजानामिति प्रजाः जनाः उपसर्गे च संज्ञायामिति डप्रत्ययः तासां विनयस्य शिक्षायाः आधा
नात्करणात् सन्मार्गवर्तनादित्यर्थः रक्षणात् भयहेतुभ्यस्त्राणात् आपत्तिवारणादिति याव
त् भरणात् अन्नपानादिभिः पोषणादपि स मुख्यः स राजा तासां पिताभूत् तासां पितरस्तु जन्महेतवो
जन्ममात्रकर्तारः केवलमुत्पादका एवाभवन् जन्ममात्रं पितृणां व्यापारः सदा शिक्षा रक्षणा
दिकं तु स एव करोतीति तस्मिन् पितृत्वव्यपदेशः अत्राह गौतमः स पिता यस्तु पोषक इति ११

२४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्थितेऽपीति दंडमर्हंतीति दंड्याः दंडादिभ्यो यदिति यत्प्रत्ययः अदंड्यान् दंडयन् राजा दंड्यांश्चैवाप्यदं
डयन् अयशो महदाप्नोति नरकं चैव गच्छतीति शास्त्रवचनम् नान् दंड्यान् च स्थिते लोकत्र
ति इत्यैव दंडयन् सोऽत्र यतनवे प्रवर्तनीयः सनानापेपव परिशोचः दोषान्सरी रक्षतामनीषि

स्थिते दंडे यतो दंड्यान्परिशोचः प्रवर्तनये अर्थकामौ
न साक्षात् धर्म एव मनीषिणः २५

एतावित्थं साधकामाववि धर्म एवात्मज्ञानो प्रत्तेत्र्द्ध अर्थकाम साधनयोर्दंडविवादयो
र्लोकस्याप्रवनरत्नोसारन रूपधर्मार्थेनेनानुष्ठानादर्थकामावपि धर्माशेषतामापादयन्तस्त
त्राधर्मोत्तरो भूदित्यर्थः आह गौतमः यथाशक्ति धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. १२ दुदोहेति स राजा यज्ञाय यज्ञं कर्त्तुं गां भुवं दुदोह करग्रहणेनैव रिक्तां चकार मघवा देवेंद्रः सस्याय सस्यं वर्द्धयितुं दिवं स्वर्गं दुदोह वृष्टिलोकान्महीलोके वृष्टिमुत्पादयामासेत्यर्थः क्रियार्थोपपदस्येत्यादिना यज्ञसस्याभ्यां चतुर्थी एवमुभौ संपद्विनिमयेन परस्परमादानप्रतिदानो

दुदोह गां स यज्ञाय सस्याय मघवा दिवं संपद्विनिमयेनो
भौ दधतुः भुवनद्वयं २६

भ्यां भुवनद्वये दधतुः पुपुषतुः राजा यज्ञैरिंद्रलोकमिंद्रश्चोदकेन भूलोकं पुपोषेत्यर्थः उक्तं च देवेनीतौ राजा वर्षन्समाहृत्य कुर्यादिंद्रमहोत्सवम् प्रीणितो मेघवाहनस्तु महतीर्वृष्टिमावहेदिति २६ ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नेति राजानो नेतारः रक्षितुर्गोप्तुस्तस्य राज्ञो यशो नानुययुः किल नानुचक्रुः खलु कु
तो यशस्यानुकारस्तत्तस्करता चौर्यं परस्वेभ्यः परधनेभ्यः तद्विषयभूतेभ्यो व्यावृत्ता
सती श्रुतौ वाचकशब्दे स्थिता शब्दमात्रमुपलभ्यते नार्थतः अभावात् तस्करशब्द एव वा पहृतमुत्प
थेः अथवा अन्येनास्तेयज्ञानेन शब्दं करोतीति न्यायेन शब्देन स्थिता तस्करविनाशनस्वरूपेणोक्तौ

न किलानुययुस्तस्य राजानो रक्षितुर्यशः व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थि
ता १७ द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधं त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्ष
ता १८

तस्यैः १७ द्वेष्य इति शिष्टो जनः द्वेष्यः शत्रुरपि तस्यार्तस्य रोगिणः औषधं यथौषधमि
व तस्य सम्मतोऽनुमत आसीत् दुष्टो जनः प्रियोऽपि प्रेमास्पदोऽपि तस्य त्याज्यः सर्पक्षता
अङ्गुलिरिव छेद्यः त्याज्य इत्यर्थः दुष्टात्मा दुर्जनः त्याज्य आसीत् तस्य शिष्टपरिपालनं
दुष्टपरित्यागश्चेत्यर्थः १८ ॥

25

र॰टी॰ तस्य परोपकारित्वं नमित्ति वेधाः स्रष्टा प्रजापतिर्वेधा इत्यमरः तं दिलीपं समाधीयतइति समा
२६ धिः कारणसामग्री महाभूतानां समाधिस्तेन विदधे ससर्ज नूनं ध्रुवमित्युत्प्रेक्षा नहि तस्य
राज्ञः सर्वे गुणाः रूपरसादिमहाभूतगुणवदेव परार्थं प्रयोजनमेवैकं मुख्यं फलं येषां ते तथा
कार्यानुमानाच्च महाभूतगुणोपमानेन कारणगुणाः कार्यं संक्रामंतीति न्यायः सूचितः ॥ २९ ॥ स इति वे
लासमुद्रकूलानि वेलाः कूलेपि वारिधेरिति विश्वः ताएव वप्रवलयाः प्राकारवेष्टा यस्यास्तां

तं वेधा विदधे नूनं महाभूतसमाधिना तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९ ॥
स वेलावप्रवलयां परिखीकृतसागरां अनन्यशासनामुर्वीं शशासैकपुरीमिव ३०

स्याच्चयो वप्रमस्त्रियाम् प्राकारो वरणः शालः प्राचीरं प्रांततो वृतिरित्यमरः परितः खातापरिखा
दुर्गवेष्टनं खातानखेयपरिखेत्यमरः अन्येष्वपि दृश्यत इति अपिशब्दात्खनेर्डप्रत्ययः अपरिखाः
परिखाः संपद्यमानाः कृताः परिखीकृताः सागरा यस्यास्ताम् अभूततद्भावे च्विः अविद्यमानमन्य
स्य राज्ञः शासनं यस्यास्ताम् अनन्यशासनामुर्वीमेकपुरीमिव शशास अनायासेन शासितवानि २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्येति तस्य राज्ञः मगधवंशे जाता मगधवंशजा सप्तम्यां जनेर्ड इति डप्रत्ययः एतेनाभिजात्य
मुक्तम् दाक्षिण्यं परच्छन्दानुवर्तनम् दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु इति शाश्वतः
तेन रूढेन प्रसिद्धेन तेन नाम्ना अध्वरस्य यज्ञस्य दक्षिणाख्या पत्नीव सुदक्षिणा इति प्रसिद्धा
पत्नी आसीत् अत्र स्मृतिः यज्ञो गंधर्वस्तस्याप्सरस इति दक्षिणया दाक्षिण्येन नाम श्रोत

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा
कलत्रवन्तमात्मानमवरोधे महत्यपि तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ३१

ज्ञो दक्षिणत्वं प्रापकत्वेनेदं तन्न इति दक्षिणेऽङ्गप्रतिग्रहे हेति स्मृतेः ३१ कलत्रवन्तमिति वसुधा
धिपो दिलीपोऽवरोधेऽन्तःपुरवर्गे महति सत्यपि मनस्विन्या दृढचित्तया पतिचित्तानुवृ
त्त्यादिनिर्बन्धवत्तमपेक्ष्यः तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्रवन्तं भार्यावन्तं मे
ने कलत्रं श्रोणिभार्ययोरित्यमरः वसुधाधिपत्वेनानेन वसुधायाश्चेति गम्यते ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
१४

27

तस्यामिति आत्मानुरूपायां तस्यां आत्मनो जन्म यस्यासौ आत्मजन्मा पुत्रस्तस्मिन् समुत्सुकः यद्वा
आत्मनो जन्म निजपुत्ररूपेणोत्पत्तौ समुत्सुकः तत्र आत्मा वै पुत्रनामासीति श्रुतेः विलंबितं फलं
पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रो भवेदित्यादिभिः कालं निनाय यापयामास ३३ संता

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलंबितफलैः कालं स निनाय मनोरथैः ३३
संतानार्थाय विधये स्वभुजादवतारिता तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ३४

नेति तेन दिलीपेन संतानाय संतानोत्पत्तिः प्रयोजनं यस्य तस्मै संतानार्थाय विधये अनु
ष्ठानाय स्वस्य भुजादवतारिता अवरोपिता जगतो गुर्वी धू
र्भारः सचिवेषु निचिक्षिपे निहिता ३४

१५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रयेति अथ प्रयतौ वनारण्यनेन नरेत्युपुत्रकाम्यया आत्मनः पुत्रेच्छया काम्यच्चेति पुत्रशब्दात्काम्यच्प्रत्यय
यः अप्रत्ययादिति स्त्रीकाम्यधातोरप्रत्ययः तं वसिष्ठं वनयात्रो दंपती जायापती राजदंतादिषु जा
याशब्दस्य निपातनात्साधुः तौ दंपती प्रयतौ प्रयत्नवंतौ विधातारं ब्रह्माणमभ्यर्च्य वसिष्ठस्य
गुरोः कुलगुरोः आश्रमं जग्मतुः कुलगुरोर्वसिष्ठस्याश्रमं जग्मतुः पुत्रप्राप्त्युपायो
पदेशायेत्यर्थ इति शेषः ३५ स्निग्धेति स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तमेकं स्यंद

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमं ३५ स्नि
ग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३६

नं रथमास्थितौ प्रावृषि भवः प्रावृषेण्यः प्रावृष एण्य इति एण्यप्रत्ययः तं प्रावृषेण्यं पयोवाहं मेघं वि
द्युदैरावताविवास्थितौ ऐरावतो नाम मतंगजविशेषः इराः आपः इरावान्समुद्रः तस्मा
त्संभवः इरावानस्मिन्नस्तीति स इरावान्सागरः ऐरावतः ऐरावतो नाम यथा दृप
तादिनि तीरस्वामी ऐरावतवंशेऽद्भुतो विद्युत्साहचर्यमेवैतत् किं च विद्युत् पयोवाहसाहचर्या
दैरावतीसदृशावैरावतस्त्रीपैरावतीति तीरस्वामी तस्मात्प्रक्रमेऽपि विद्युदैरावताविव
वेति एकरथ्यारोहणेऽपि कार्यसिद्धिर्बीजमन्यमार्गनने सोपानस्य न स्यादिति ३६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. माभूदिति पुनः किंभूतौ दंपती आश्रमपीडा माभूत् माऽस्त्विति हेतोः माङि लुङि ति आशीरर्थे 29
१५ लुङ् न माङ्योगात् अडागमप्रतिषेधः परिमेयपुरःसरौ परिमितपरिचारौ अनुभावविशेषा
त्तु तेजोविशेषात् सेनापरिवृताविवास्थितौ ३७ सेव्यमानाविति पुनः किंभूतौ सुखस्पर्शैनलत्वा

वि२

मा भूदाश्रमपीडेति परिमेयपुरःसरौ अनुभावविशेषात्तु सेनापरिवृताविव ३७ सेव्य
मानौ सुखस्पर्शैः शालनिर्यासगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ३८

त्वक्प्रियः सुखस्पर्शैः येवातैः शालनिर्यासगंधिभिः सर्जतरुनिर्यासगंधवद्भिः शालः सर्जतरुः
स्तन इति शाश्वतः उत्किरंतीति विक्षिपंतीति उत्किराः इगुपधेत्यादिना किरतेः कः प्रत्य
यः पुष्परेणूनामुत्किराः तैः आधूता ईषत्कंपिता वनराजयो यैस्तैर्वातैः सेव्यमानौ
पतेर्विशेषणे तौ प्रोत्साहमाघ विवक्षितम् ३८ ॥ १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मन इति पुनः रथनेमिस्वनोन्मुखैः मेघध्वनिशंकया उन्नमितमुखैरित्यर्थः शिखंडिभिर्मयूरैर्द्वि
धा भिन्नाः पुंस्त्रीकृतभेदेन ग्रावैः कृतावस्थायामच्युताच्युतभेदेन वा षड्जो द्विविधः तस्मा
द्धेतोः केका अपि द्विधा भिन्ना इत्युच्यते अत एवाह षड्जसंवादिनीरिति षड्जः संजायते यस्मात् ष
वादिनीति षट्स्थानेभ्यो जातः षड्जः तज्जाम् नासाकंठमुरस्तालुजिह्वादन्तांश्च संस्पृशन्

मनोभिरामाः शृण्वतो रथनेमिस्वनोन्मुखैः षड्
जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः ३९

तस्मात् षड्जः संजायते यस्मात् षड्ज इति स्मृत इति स च तंत्रीकंठजन्मस्वरविशेषः निषादर्षभगा
न्धारषड्जमध्यमधैवताः पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः षड्जेन संवादिनीः सदृशीः
तदुक्तं मातंगेन षड्जं मयूरो वदति मनोभिरामाः मनसः प्रियाः केका इति कायति ध्वनतीति
ति केकाः मयूरवाण्यः केका वाणी मयूरस्येत्यमरः ताः केकाः शृण्वतोरिति श्लोकार्थः ३९

स्वरा इत्यमरः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. १६ परस्परेति विभ्रमादद्दूरेण मार्गेण यथा भवति तथा उज्झितं वर्त्म यैस्तेषु स्यंदनाबद्धदृष्टिषु
स्यंदने रथे आबद्धा प्रसज्जिता दृष्टिर्नेत्रं येषां ते दृष्टिर्नेत्रं लोचनं वर्त्म नयनं चक्षु
क्षिणी निहलाबुधः तेषु स्यंदनाबद्धदृष्टिषु केन केन वशादयासन्नदृष्टिषु मृगेषु

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु मृ
गद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४०

मृगाश्च पुमान् स्त्रियेषसेकेशेषः तेषां द्वंद्वेषु स्त्रीपुंसो मिथुनं द्वंद्वं मिथुनमरः परस्परा
णामक्षिसादृश्यं पश्यंतौ अदूरं उज्झितं मार्गो यैस्तेषु मृगेषु सदृशाक्षिसादृश्यं मृगे
ष्वेव विवेकत्वम् ४० १६

श्रेणीति श्रेणीबंधात्पंक्तिबंधाद्धेतोरस्तंभां स्तंभरहितां तोरणस्रजं वहिर्द्वारम् तोरणोस्त्री वहिर्द्वा
रमित्यमरः ता[illegible]या स्रजो विरच्यते तेना तोरणस्रजं वितन्वद्भिः ऊर्ध्वं द्विति वेलर्थः उन्नतायाश्चे
ज्ञकेवशब्दप्रयोगाभावेपिगम्योत्प्रेक्षेत्येयम् कलनिर्ह्रादैरव्यक्तमधुरध्वनिभिः सारसैः प
क्षिविशेषैः करणैः क्वचिदुन्नमिताननौ सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः ३

श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सारसैः कलनिर्ह्रादैः क्वचिदुन्नमितान
नौ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्कीर्णैरस्पृष्टाल
कवेष्टनौ ४२

नियारद्वः ४१ पवनस्येति प्रार्थनासिद्धिशंसिनः स्वानुकूलत्वादे
वमनोरथसिद्धिसूचकस्य पवनस्यानुकूलत्वाद्धेतोर्व्यदिगभिमुखत्वात् तुरगोत्कीर्णैस्तु
रगोद्धूतैरजोभिः अस्पृष्टामलकादेवेष्टनमुष्णीषं च यसौ तौ तथोक्तौ शिरसावे
ष्टनशोभिनास्तुतत्र इति वत्तनिच ४२

र.टी. सरसीष्विति सरसीषु वीचिविक्षोभशीतलं मृ॰सेव्यद्वेनेन शीतलं स्नानैः स्वात्मनुक
२१ र्णनोल्लसमेति स्वनिःश्वासानुकारिणं एतेन तयोरुत्तमस्त्रीपुंसजातीयत्वमुक्त
म सरविंदानामामोदमुपजिघ्रन्तौ घ्राणेन गृह्णन्तौ ४३ ग्रामेष्विति ग्रामेष्वात्मविसृष्टेषु
स्वदत्तेषु यूपो नाम संस्कृतः पशुबंधाय दारुविशेषः यूपा एव चिह्नानि येषां तेषु

वी सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारि
णं ४३ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः प्रतिगृह्णन्तावर्घ्यानु
पदमाशिषः ४४

ग्रामेषु अमोघाः सफलाः यज्वानो विधिनेष्टवन्तो यज्वानः विधि
नेष्टवानित्यमरः सुयजोर्ड्वनिप् इति ड्वनिप्प्रत्ययः आशिषः आशीर्वादान् अ
र्घैः पूजाविधिभिः सह यज्वानं पादार्घाभ्यां चेति यत्प्रत्ययः यद्वार्घविशेषमर्घ्यमा
श्रैपाद्यपादार्घ्यवारिणीत्यमरः अर्घ्यस्यानुपदमन्वक् अर्घ्यस्वीकारानन्तरमित्यर्थः गर
हीतौ स्वीकुर्वन्तौ पदस्य पश्चादनुपदं पश्चादर्थे अव्ययीभावः अन्वगन्वक्षमनुपदं क्लीबमव्य

हैयंगवीनमिति ह्यस्तनगोदोहोद्भवं घृतं हैयंगवीनम् ह्यः एवैयुलत् हैयंगवीनं स्यात् ह्योगो
दोहोद्भवं घृतमित्यमरः हैयंगवीनं संज्ञायामिति निपातः तत्सद्योघृतम् आदाय उपस्थितान् घो
षवृद्धान् घोषस्त्वाभीरपल्ली स्यादित्यमरः वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ नाम
रूपभागधेयः स्वार्थे दुहाचीत्यादिना पृच्छतेर्द्विकर्मकत्वम् ४५ इति द्वाभ्यां कुलकं का

हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखि
नां ४५ कुलकं काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्यो
गे चित्राचन्द्रमसोरिव ४६

कीति व्रजतोः गच्छतोः शुद्धवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षिणादिलीपयोर्हिमनिर्मु
क्तयोश्चित्राचन्द्रमसोरिव योगे सति कापि अनिर्वाच्या अभिख्या शोभा आसीत् अभिख्या ना
मशोभयोरित्यमरः स्रानस्त्रीयस्तर्हीन्दुः सृञ्जयः चित्रानक्षत्रविशेषः शिशिरा
पगमे चैत्र्यां चित्रापूर्णौ चन्द्रमसोरिवेत्यर्थः ४६ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नदीरिति प्रियंदर्शनं स्वकर्मकं यस्यासौ प्रियदर्शनः दर्शनीयः इत्यर्थः भूमिपतिः दिलीपः
र.टी. पत्न्यैतत् तरद्रुमैः तेश्वस्तु दर्शयन् लंघितमपि वाहितमप्यध्वानं न बुबुधे न ज्ञातवान् बु
१८ धः सौम्य उपमा यस्य उपमानं यस्येति विग्रहः इदं विशेषणेन तन्न तद्दर्शयन्निति उपमायोगि
तयेनस्यज्ञातत्वसूचनार्थम् ॥४७॥ स दुःप्रापेति दुःप्रापयशाः दुःप्रापमन्यैर्दुर्लभं यशो य

तं भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ॥४७॥
स दुःप्रापयशाः प्रापदाश्रमं श्रान्तवाहनः सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४८॥

स्य स तथोक्तः श्रान्तवाहनो दूरोपगमनात् क्लान्तयुग्यः महिष्याः सखा महिषीसखः रा
ज्ञाहः सखिभ्यष्टजिति टच् प्रत्ययः तस्याः नैरपेत इति भावः स राजा सायं सायं
काले संयमिनो नियमवतस्तस्य महर्षेर्वसिष्ठस्याश्रमं प्रापत्
प्राप्तवान् इत्यादिना दुः ॥४८॥ १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमाश्रमं विशिनष्टि वनांतरादिति वनांतरादन्यस्मादरण्यांतरादुपावृत्तैः प्रत्यागतैः समित्कुश 36
फलानि च आहरंतीति शीलं येषां ते इति समित्कुशफलाहरास्तैः अदृश्याग्निप्रत्युद्यातैः
नराद्यप्रत्ययः अदृश्यैरदृश्यमानैरग्निभिर्वैतानिकैः प्रत्युद्याताः प्रत्युद्गतास्तैस्तपस्विभिः

वनांतरादुपावृत्तैः समित्कुशफलाहरैः । अ
ग्निप्रत्युद्यातैः पूर्यमाणं तपस्विभिः ॥ ४९

पूर्यमाणं पोष्यमाणं गच्छतामाहिताग्नीनामग्निप्रत्युद्यानं विधिप्रकृतैः यथाहवान्ने पितरं पश्चो
चितवासं तु ततः अन्ये यो वनं सेवते तस्यापि नमग्नयः प्रत्युद्यान्ति शालोदाहरणं वा हरनीतिय
चनात् उत्तेः प्रत्युद्याहारविनिता हृगानि विज्ञायते ४८ ॥ ॥

म्राकीर्णमिति नीवाराणांभाग एव भागधेयः। प्रंशः रूपनामभागेभ्योधेयप्रत्ययोवक्तव्यः
निस्वार्थेधेयप्रत्ययः भागधेयः करोवलिरित्यमरः। तस्योचितैः। अतएव उटजानां
पर्णशालानां द्वाररोधिभिः द्वाररोधकैः मृगैः ऋषिपत्नीनां अपत्यैरिवाकीर्णं व्याप्तं

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः। अपत्यैरिवनीवारभागधेयोचितैर्मृगैः ५०
सेकांतेमुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं विश्वासायविहंगानामालवालांबुपा
यिनां ५१

म० ५० सेकांतइति सेकांतेवृक्षमूलसेचनावसानेमुनिकन्याभिः आलवाले
जलाधारप्रदेशेभूपदेवृक्षस्यादिनाम स्यादालवालमावाल[illegible]इत्यमरः विहं
गानांपक्षिणांविश्वासायविश्रंभाय समौविश्रंभविश्वासावित्यमरः तत्क्षणेसेकक्ष
णेउज्झिताः वालवृक्षकाः यस्मिन्तत् अल्पार्थेकप्रत्ययः ५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आतपात्यय इति आतपात्यये आतपापगमे सति संक्षिप्ता राशीकृताः नीवारास्तृणधान्यानि या
सु ताः तृणधान्यानि नीवारा इत्यमरः उटजानां पर्णशालानां अंगणभूमिषु चत्वरस्थानेषु प
र्णशालोटजोस्त्रियामित्यमरः अंगणं चत्वराजिरे इत्यमरः निषादिभिरुपविष्टैर्मृगैर्वर्तितो

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगणभूमिषु ५२
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ५३

निष्पादितो रोमंथश्चर्वितचर्वणं यस्मिन्नाश्रमे तं ५२ अभ्युत्थितेति अभ्युत्थिताः प्रज्वलिताः
होमयोग्या इत्यर्थः समिद्धेऽग्नावाहुतिं जुहोतीति वचनात् तेषामग्नीनां पिशुनैः सूचकैः
पवनोद्धूतैराहुतिगंधो येषामस्तीत्याहुतिगंधिनः तैर्धूमैराश्रमोन्मुखान् अतिथी
न् पुनानं पवित्रीकुर्वाणम् ५३

र.टी. कुलकं युग्मेति युग्माश्रमयाचलनंतरं स राजा यंतारं सारथिं आदिश्य धुरं वहंतीति धुर्यास्तु
२. ग्याधुरो यड्ढकाविति यत्प्रत्ययः ढे येनः धुर्यान् व्याख्यान धुर्या धुर्वहधौरेयधुरीणास्स
धुरंधरा इत्यमरः विश्रामय विनीतश्रमान् कुर्विति आदिश्य पत्नीं तां पत्नीं रथात् अवारोप्य
इवतारितवान् स्वयं चावततार ५४ तस्मै इति सभायां साधवः सभ्याः सभायां यदिति य

कुलके युग्मं यंतारमादिश्य धुर्यान्विश्रामयेति सः। तामवारोपयत्पत्नीं रथाद
वततारच ५४ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः। अर्हणामर्हते चक्रु
र्मुनयो नयचक्षुषे ५५

प्रत्ययः गुप्ततमेंद्रियाः अत्यंतनियमितेंद्रियाः मुनयः सभा
र्याय गोप्त्रे रक्षकाय नयः नीतिशास्त्रमेव चक्षुस्तत्वावेदके प्रमाणं यस्य तस्मै नयचक्षुषे
अतएवार्हते पूजार्हाय पूज्यायेत्यर्थः अर्हः प्रशंसायामिति शतृप्रत्ययः तस्मै राज्ञे अ
र्हणां पूजां चक्रुः पूजा नमस्यापचितिः सपर्यार्चार्हणाः समा इत्यमरः ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विधेरिति सायंतनस्य सायंभवस्य सायंचिरमित्यादिनाट्युप्रत्ययः विधेर्जपहोमाद्यनुष्ठानस्यान् 40
ते अवसाने अरुंधत्या अन्वासितं पश्चादुपवेशनेनोपासितं कर्मणि क्तः उपसर्गवशात् स
कर्मकत्वं अन्वास्येतामित्यादिवदुपपद्यते तपोनिधिं वसिष्ठं स्वाहया स्वाहादेव्या अग्नाय्या
यी स्वाहा च हुतभुक्प्रियेत्यमरः अन्वासितं हविर्भुजमिव ददर्शेत्युपमा ऊरुणाग्रेतुम

विधेः सायंतनस्यांते स ददर्श तपोनिधिं अ
न्वासितमरुंधत्या स्वाहयेव हविर्भुजं ५६

रज्ञातनयापालिकः जपहोमेष्वकुर्वाणो नाभिवाद्यो द्विजो भवेदिति अनुष्ठानसमयेऽभि
वादनस्य निषेधाद्विधेरन्ते ददर्शेत्युक्तम् अन्वासितेन चात्र पतिव्रताधर्मत्वेनोक्तं त
त्व कर्मांगत्वेन विधेरनंतरं नित्यकर्मणः समाप्त्यभिधानात् ५६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. तयोरिति मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुंधतीवसिष्ठयोः
२१ पादान्‌ चरणान्‌ जगृहतुरभिवादनं चक्रतुरित्यर्थः पादा रश्म्यंघ्रितुर्यांशाः पादः पदंघ्रिश्चर
णोस्त्रियाम्‌ तेषु पीत्कुटिकेतुस्तः स्त्रियाः पादा सित्तयोरयस्त्वमरः पादग्रहणमभि

तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ५७

वादने परमेश्वमे पादग्रहणमभिवादनमित्यमरः गुरुपत्नी च गुरुश्च कर्तारौ सा
च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिननंदतुः आशीर्वादादि
भिः संभावयांचक्रतुरित्यर्थः ५७ २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमिति मुनिरतिथ्यर्थमातिथ्यम् अतिथेर्ज्य इति ञ्यप्रत्ययः आतिथ्यस्य क्रिया तया शांतो 42
रथक्षोभजापः परिश्रमो यस्य तत् तथोक्तं राज्यमेवाश्रमस्तत्र मुनिं मुनितुल्यमित्यर्थः तं
दिलीपं राज्ये कुशलं पप्रच्छ पृच्छतेर्द्विकर्मकत्वम् यद्यपि राजशब्दः पुरोहितादिगणा
द्राजकमेव वचनं तथाप्यत्र सामान्यवचनः उपपन्नं न तु शिवं स्वस्ति क्षेमं इत्यमरविरोधा

155 तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् पप्रच्छ कुश
लं राज्ये राज्याश्रममुनिं मुनिः ५८

त् तथाह मनुः स्वाम्यमात्यदुर्गराष्ट्रकोशदंडौ तथा सुहृत् सप्तैतानि समस्तानि लोके
स्मिन् राज्यमुच्यते इति तं ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् वैश्यं क्षेमं समागा
म्य शूद्रमारोग्यमेव चेति मनुवचने सत्यपि तस्य राज्ञो महानुभावात् ब्राह्मणोचितः कु
शलप्रश्नप्रवृत्तः तमनुसंधेयं अत एवोक्तं राज्याश्रममुनिरिति ५८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथेति अथ प्रश्नानंतरं विजितारिपुरो विजितशत्रुनगरो वदतां वक्तृणां वरः श्रे 43
र.टी. ष्ठः पतत्त्वनिर्द्धारणमिति षष्ठी पुरः स्त्रीपुरीनगर्य्यौ इत्यमरः अर्थपतिः रा
२२ जा अथर्वणो ऽथर्ववेदस्य निधेस्तस्य मुनेः पुरोग्रे ऽर्थ्यामर्थादनपेतां धर्म्यप

अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः। अर्थ्यामर्थपतिर्वाचमाददे वद
तां वरः ५८

थ्यां अन्याय्यादनपेतमिति यत्प्रत्ययः वाचमाददे वक्तुमुपक्रांतवानित्यर्थः अथ
र्वनिधेरित्यनेन गुरोर्हितकर्माभिज्ञत्वात् प्रकृतकार्यनिर्वाहकत्वं मुनेरस्तीति
सूच्यते यथाह कामंदकः त्रय्यां च दंडनीत्यां च कुशलः स्यात्पुरोहितः अ २२
थर्वविहितं कुर्यान्नित्यं शांतिकपौष्टिकमिति ५८

उपपन्नमिति हेतुरे सप्तस्वंगेषु स्वाम्यमात्यादिषु स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि
च सप्तांगानीत्यमरः शिवंकुशलमुपपन्नंनयुक्तमेव ननु वधारणे प्रश्नावधारणानुज्ञानु
नयामंत्रणे नन्वित्यमरः कथमित्यत आह यस्य मे दैवीनां देवेभ्य आगतानां दुर्भिक्षादीनां मा

उपपन्नंननु शिवं सप्तस्वंगेषु यस्य मे दैवी
नां मानुषीणां च प्रतिहंता त्वमापदां १०

नुषीणाम् मनुष्येभ्य आगतानां चोरभयादीनां उभयत्रापि तत आगत इत्यण् दि
ह्वाग्निज्जिमारादिनाडीव आपदां तासां नानां त्वं प्रतिहर्ता वारयितासि अत्राह कामंदकः
हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा इति पंचविधं दैवं मानुषं व्यसनं ततः आयुक्तकेभ्य
श्चौरेभ्यः परेभ्यो राजवल्लभात् पृथिवीपतिलोभाच्च नराणां पंचधा मतमिति १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्र मानुषप्रतीकारमाह तवेति मंत्रान्कृतवान्मंत्रकृत् सुकर्मपापमंत्रपुण्येषु कृञ
र.टी. इति क्विप् दूरात्परोक्षएव संशमिताअरयो यैस्तैः तस्य मंत्रकृतो मंत्राथर्वणोक्तस्य प्रयोक्तुः
२३ वीत तव मंत्रैः कर्तृभिः दृष्टमलक्ष्यं चैतत् भिंदंतीति दृष्टलक्ष्यभिदो मे श

तव मंत्रकृतो मंत्रैर्दूरात्संशमितारिभिः
प्रत्यादिश्यंत इव मे दृष्टलक्ष्यभिदः शराः ६१

राः प्रत्यादिश्यंत व्यर्थवचयमेव समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियंत इवेत्यु
त्प्रेक्षा प्रत्यादेशो निराकृतिरित्यमरः त्वन्मंत्रसामर्थ्यादेव नः पौरुषफललो
भिभावः ६१ ॥ २३

संश्रुतेरेविकं प्रतिकारमाह हर्वीति हे हेतेन स्वपाविधिवदग्निषु वर्जितं प्रतितेषु हविर्याजा
दिकं कर्त्तं ग्रहवग्रहेवर्षप्रतिवेधः वृष्टिर्वेधेन हि ग्रानेवग्रहावग्रहेसमाविस्मरः अव

46

हविर्यांवर्ज्जितेहेतेन स्वपोविधिवद्ग्निषु वृ
ष्टिर्भवतिसस्यानांमवग्रहविशोधिएं ६२

ग्रहेवर्षप्रतिबेधः स्मवश्मयः तेनविशोधितेंविशुध्यतोसस्यानांवृष्टिर्भवति वृ
ष्टिवृधेनसस्यसुपजीवंयतीतिभावः प्रश्नमतुः प्रश्नाशलाङ्गतिःसम्यगादित्यसुप
तिष्ठते यादित्याज्ञापनेवृष्टिर्वृष्टेरन्नंततः प्रजेति ६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र॰ टी॰ २५ पुरुषेति आयुर्जीवितकालः आयुर्जीवितकालः स्यादित्यमरः पुरुषस्यायुः पुरुषायु
षं वर्षशतमित्यर्थः शतायुर्वै पुरुष इति श्रुतेः अचतुरेत्यादिना सूत्रेण च प्रत्ययान्तो
निपातः मदीयाः प्रजाः पुरुषायुषं जीवन्तीति पुरुषायुषजीविन्यः निरातंकाः निर्भयाः
आतंको भयमाशंकेति हलायुधः निरीतयोऽतिवृष्ट्यादिरहिताः ईतिरतनस्तवेस

पुरुषायुषजीविन्यो निरातंका निरीतयः यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्म
वर्चसं ६६

त्वद्ब्रह्मवर्चसं न ब्रह्माध्ययनसंपत्तिरेव हेतुः ब्रह्माध्ययन
संपत्तिरेव हेतुः ब्रह्माध्ययनसंपत्तिस्तेजो ब्रह्मवर्चसमिति हलायुधः ब्रह्म
णः वेदस्य वर्चः ब्रह्मवर्चसम् ब्रह्महस्तिभ्यां वर्चस इत्यच्प्रत्ययः अतिवृष्टिरना
वृष्टिः शलभाः मूषकाः शुकाः प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः इति २५

तयेति ब्रह्मयोनिः कारणं यस्य तेन ब्रह्मपुत्रेण गुरुणा तयैव तु क्रमशः कारेण चिंतयमानस्या
नुध्यायमानस्य तत्पद्वं निरापदो व्यक्तं न हि न समे संपदस्तानुवंधाः सानुरताः प्रवि
ष्ठिन्ना रतिपावत्कथं न स्युः स्वरैवेमथैः ८ सेश्वस्यागमनं न श्योज्जन माह किंन्विति

तयैवैविंतयमानस्य गुरुणा ब्रह्मयोनिना सानुवंधाः कथं न स्युः संपदो मे नि
रापदः १४ किं नु वध्यौ नैव वेत्स्यसि मह्यं कुसुमश्रजं न मामवति सद्वीपा रत्नसू
र[illegible]पि मेदिनी १५

किं नु तवैव न संवध्यां स्तुषायां वध्यैः जींयात्व पावैवेममरः श्रद्दिष्टास
दृशी यस्तुत्रूपायज्जो येन न ते मा सद्वीपापि रत्नानि सूयत इति रत्नसूरपि सानुद्विधस्या
दिना किंच मेदिनीना वालिन प्रीणाति प्रवधातो रत्नगाति प्रीत्या घयेषु उपदेशाद
वप्रीणेन रत्नसूरपि इत्यनेन सर्वरत्नेभ्यः श्रेरत्नमेव स्त्राद्यामिति सूच्यते १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

49

र॰टी॰ नदेवशक्नोपारयति नूनमिति मत्तः परं मदनंतरम् वंश्याः कुलसंभूताः पिंडविच्छेददर्शिनः
२५ पिंडदानविच्छेदस्तुतप्रेक्ष्यमाणाः वंशेभवाः वंश्याः पितरः स्वधेत्यव्ययं पितृभोजे व-
चनेनतस्यसंग्रहेनतत्पराः आसक्ताः संतः श्राद्धे पितृकर्मणि पितृदाननिवापः स्या।

नूनंमत्तःपरंवंश्याःपिंडविच्छेददर्शिनः न
प्रकामभुजःश्राद्धेस्वधासंग्रहतत्पराः ६६

श्राद्धेनतत्कर्मशास्त्रस्मरः प्रकामभुजः पर्याप्तभोजिनोनभवेतीतिशेषः न
वैसंतंकामंप्रकामंपर्याप्तमित्यमरः किंतुनालंचापद्धतंयदपिसंग्रहंतीतिभावः ६६ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ममरक्षेति मत्परे तस्मिन्नेतरं अमारादिति पंचमी दुर्लभं दुर्लभेऽमत्वाम पायाद्वर्जितं इति पद्यः स 50
र्वैः पितृभिः स्वनिः स्वासैः इदूरवज्जनैः कवोल्लमीषद्रुल्लेपद्यानतयादुपभुज्यते उपभोग्यस्तेन न नामि
ति कवोल्लमिति कवचोल्लेशं निकुशाहृस्य कृचादेशः कोल्लेकवोल्लं मेहोल्लेकदुल्लेविशुतहूनिश्वस
मरः ६२ स इति हृज्यायागः व्रजपजोभीवकायपद्मनिकायप हृज्या पाविशुद्धात्मा विशुद्धे चेतनः प्र

समरैर्दुर्लभैर्मत्वा नूनं मा वर्जितैर्मृषा पथः सर्वैः स्वनिःस्वासैः कवोल्लमुपभुज्यते ६२ सो
ऽहमिज्याविशुद्धात्मा प्रज्ञालोपनिमीलितः प्रकाशस्याप्रकाशस्य लोकालोक इवाचलः ६३

ज्ञालोपेन संज्ञस्याभावेन निमीलितः कृतमीलनः सोऽहं लोक्यत इति लोकः न लोक्यत इ
त्यलोकः लोकस्याप्रकाशस्यालोकस्य चेति लोकालोकस्य चेति लोकालोकस्य कुवालोचल इव लो
कालोकस्य कवालो चलद्वत्समूहः प्रकाशत इति प्रकाशस्य देवऋणविमोचनात् न प्रकाश
त इत्यप्रकाशस्य पितृऋणाविमोचनात् पचायच् अस्मीति शेषः लोकालोको यतः
सूर्यसंपर्कार्द्धाहिल्लमो व्याप्याच प्रकाशस्याप्रकाशश्चेति मतम् ६३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स.टी.
२६

ननुतपोदानादिसंपन्नस्य किमशान्तैरित्यत आह लोकांतरेति सत्सुद्भवत्वस्मादि
निस्तत्सुद्भवः कारणं तपोदाने सत्सुद्भवोपसंनतपोदानसत्सुद्भवं वपरे त्वम्
परलोकांतरे परलोके इह च अमुत्र च च लोके केवलस्व स्वकरं तपादि सु
द्भवशोभवाभ्युदयं श्रणसनं तिस्रः परत्र परलोके इह च अमुत्र च च लोके शर्मेण

लोकांतरसुखं पुण्यं तपोदानसमुद्भवं संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥
तयाहीनेन विधातर्मां कथं परयन्नस्यसे सिकेत्वयमिवेत्वरोहं धर्मामृतमहतके

स्वत्वाय शर्मेशांतिस्वर्खालिवेन्समरः भवतीति शेषः ॥ ४९ तयेति हे विधातः स्व
कुलधासंततमाहीनं तपस्तमोत्तिहान शमणात्वपमेवोऽपि त्तिमनलसकेनवर्हिंतंवे
धर्मफलमनुभोक्तुं फलोवकेशीचेत्समरः प्राप्तमेवहतकेनुतवकोनमम्मिवपरपन २६
कथमेवनहृपसेनपरितप्यसे विधातः स्मैनेन सामर्थ्यं पेवतनशानेगम्यते ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अस्तव्यमिति हे भगवन् अनेकसंख्यलोपेन कृमश्लोके अनिर्वाणस्य मज्जनरहितस्य निर्वाणो निर्हंतो मोहे
विनाशे गजमज्जनरूपितया दव: देति नो गजस्य ग्रहमेव दनीतिग्रहं तदमर्मस्तके व्रणोऽस्त्रिया 52
मीमं मह: क्लीवेऽग्रहं तदलुमर्मस्थानियमर: विधरुपोऽल्पदरुनिरवशश्रमय: ग्रहार्हिषदितिमुमा
गम: आलानेगजवंधने स्तंभमिव आलानेगजवंधनमित्यमर: मेममग्रस्तस्यासोऽहमशका

अस्तव्योऽहं भगवन्नूनमेतनमवेहि मे अहं तदस्मि वालानेमति वाणस्य देतिन: ११ तस्मा
न्न चैव यानानन संविधानेन याऽर्हसि दृष्ट्वा ह्यणोऽपराधेऽर्थेन दधीनाऽहि लिङ्गय: १२

पीडाद्य: स्वं यस्मिन्नलन् ग्रेवेहि दुःस्वरं दुःखजनकं विहीनस्थं: निर्वाणस्याऽनशयनानि श्रीणाग
जकर्मणीति पालकाव्ये ११ तस्मादिति हे नाननन तस्मात्संस्कारहरणाय यात्रेव्यमन्तकोऽभवा
मिकमर्णालडनयासंविधानेकर्तुमर्हसि हि यस्मात्कारणादिहा हृणाऽर्द्रालाकोऽरपस्याना न
ह्राजनादवक्षुरणालकतेघोऽडरापे द्व: प्रापेऽर्थेसिद्धयस्वंदधीनास्वदीयता: दृष्ट्वा हृणाऽि
तिशेषेवष्ठी नलोकेसादिना कृयोगेषष्ठीनिषेधान् १२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
२७

इतीति इति राज्ञा विज्ञापितो ऋषिः ध्यानेन स्तिमिते लोचने यस्य सः ध्यानस्तिमितलोच 53
नः क्षणमात्रं तस्थौ सुप्तमीनाः यस्मिन् सः ह्रद इव निस्तब्धो ऽतिष्ठत् ७३ सोऽपश्यदिति सः ऋषिः प्रणिधा
नेन चित्तैकाग्र्येण भावितात्मा शुद्धान्तःकरणः भुवो भर्तुः नृपस्य संततेः स्तम्भकारण

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः
सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणं भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ७४

संतानप्रतिबंधकारणमपश्यत् अथानंतरं एनं नृपं प्रत्यबोधयत् स्वदृष्टं ज्ञापितवानित्य २७
र्थः एनमिति गतिबुद्धीत्यादिना कर्तुः कर्मत्वम् ७४ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुरेति पुरा एकदा शक्रमिन्द्रमुपस्थाय सेवित्वा प्रति भुवमुद्दिश्य यास्यतो गमिष्यतस्तव पथि कल्पतरु
च्छायामाश्रिता सुरभिः कामधेनुरासीत् तत्रस्थितेत्यर्थः ७५ ततः किमित्यत आह धर्मलोपेति 54
ऋतुः पुष्परजस्तद्यावत् ऋतुस्नातां इमां मे पिचेतस्मरः ऋतुनानिमित्तेन स्नातां राज्ञीं सुदक्षिणां ध
र्मस्य ऋत्वभिगमनलक्षणस्य लोपाद्भ्रंशाद्भयात्त्वं स्मरन् ध्यायन् त्वं देगादेवनेविघ्नेन

पुराशक्रमुपस्थायतवेयंप्रतियास्यतः आसीत्कल्पतरुच्छायामाश्रितासुरभिःपथि ७५ धर्म
लोपभयाद्राज्ञीमृतुस्नातामिमांस्मरन् प्रदक्षिणक्रियार्हायांतस्यांत्वंसाधुनाचरः ७६ ॥

मधुं च तत्पूर्वम् प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु निकृतवान् विद्यतो नाश्रुतवनस्यतीति शास्त्रात्
प्रदक्षिणक्रियार्हायां प्रदक्षिणीकरणयोग्यायां तस्यां धेन्वां त्वं साधु प्रदक्षिणादि सत्कारं नाचर
न नाचरितवानसि व्यासक्तचित्तत्वात् विस्मृतवानसीति भावः ऋतुकालाभिगमने मनुः ऋतुकालाभिगामी
स्यात् स्वदारनिरतः सदेति अकरणे दोषमाह पराशरः ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति
वालगोघ्नापराधेन विध्यते नात्र संशय इति ७६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अवज्ञानासीति यस्मात् कारणात् मामवज्ञानासि तिरस्करोषि अतः कारणात् म
र.टी. त् प्रसूतिं मम संतानं तिमनाराध्य अप्रसेवयित्वा ते तव प्रजा न भविष्यतीति सा सुरभिस्त्वां श
१८

अवजानासि मां यस्मादतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां श
शाप सा ॥ सशापो न त्वया राजन्न च सारथिना श्रुतः नदत्याका
शगंगायाः श्रोतस्युद्दामदिग्गजे १८

शाप शप आक्रोशे ॥ सशापो न त्वया नाश्रावि कथमित्यत आह सशाप इति उद्दाम
दिग्गजे मत्तदिक्वारणे आकाशगंगायाः स्रोतसि प्रवाहे नदति शब्दायमाने स
ति हे राजन् सशापो न त्वया श्रुतः सारथिना च न श्रुतः १८
॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अत्रनलस्तुतेकिमापानमित्याह ईक्षितमिति नदवत्तानालभ्यायेनोरपमानानान् आत्मनः
आपृमितमोक्षितंमनोरथम् आप्नोतिः सतेनाकः ईकारमुसार्गलंसशतिवंधेविहिज्ञानी
हि नयाहि सज्जसज्जाव्यतिक्रमोनिक्रमलंभेदःशतिवध्यानिहि ७९ नहिंगवानामाराधया

ईक्षितेनेतदवत्तानांहिहिंसार्गलंमात्मनः शतिवध्यानिहिभेदः सज्जसज्जाव्यतिक्रमः ७९
नविषेदीवसत्वस्सावेदानींप्रचेतसः भुजंगापिहितद्वारंपातालमधितिष्ठति ८०

मितावाकथमागमिष्यतिरत्याशासानेत्याह नविषइति सानुशमिरिदानींदीर्घकालंचिरकाल
साध्योग्रागाविशेषोपमनसप्रचेतसोवरुणस्यप्रचेतनाः वरुणः पाशीयमरः नविषेरथ्याज्ञारि
नविरवंभुजंगापिहितद्वारंभुजंगाइद्वारंतेतोद्वः अवेशपातालमधितिष्ठतीत्यर्थः अधि
शीङ्स्थासांकर्मेतिकत्वम् ८० ॥ ॥ ॥ रामराम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

57

र.टी. तर्हि कागतिरित्यत आह स त्वमिति तस्याः स्वरभेरियंतु दीर्घोस्त्वतो स्वरभेः प्रतिनिधिं कृत्वा
२५ श्रुविः श्रुष्टः सहपत्न्या वर्तत इति सपत्नीकः सन् नच्युतस्थानि कुचशस्त्रयः आराधयहि यस्मा
त् कारणात् स्वाधीनानष्टास्तनौ कामदोग्धीति कामदुघाभवतीत्यर्थः कचवस्त्रते कचशम

सत्वमेकांतरोतसोमदीर्घोवत्समानरे आराधयसपत्नीकः स्त्वांकामेविधास्य
ति ८२ इति वादिनेव वो सहोतुराङ्गतिसाधने प्रतिपानेदनीनामधेनुशवहृतेवना
त् ८२

योघादेश्व ८१ इतीति इति वादिनो वदत एव होतुर्वनशीलस्य त्वत्रिलितत्त्वन्नयः त
सम्भने राज्ञीनां साधनेकारणेनंदयातु इति श्रुत्यस्मानंदिनीनाम श्रुतिपाल्त्वात्प्रश
स्ताधेनुर्वनाद्गावहंतेप्रत्यागता अव्याप्तपोमाविष्पस्याः कार्यसिद्धिं हि तत्रात्र इति भावः ८२ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वर्शतिशिमियैनुविशिनष्टि ललाटेति पल्लववत् स्निग्धावामौपादलावल्लंधाग्रामेवैतुहिशेष
णं घोऽस्य मल ललाटे उदयो यस्य तत् ललोदयं लमाग्रमांसहृदयम् अविद्धं कुटिलभुग्नं वेल्लितं
वक्रमित्यमरः स्रोदिनस्वेतितिष्ठानतस्य नवं नवम् स्वेतरोमाण्ये वा कलविभ्रतीनवं पाशि
नेविभ्रती संध्येव सुस्थिता ८३ भुवमिति कोसलेन किंचित्कुसुमं केवोलसः इति चकारान्तकादेशः

ललाटोदयमाभुग्नैःपल्लवस्निग्धपादला विभ्रतीस्वेनरोमाण्येकैकसंध्येव पाशिनेनवं ८२
भुवं कोसलेन्द्रोऽशीमेघेनावभ्रयादपि प्रस्तवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ८४

प्रवभ्रयादपि प्रवभ्रयस्नानादपि मेध्येन पवित्रेण प्रस्नेपवित्रेमध्यंचेत्यमरः वत्सस्यालो
कप्रदर्शनेप्रवर्तिनाप्रस्रवहनाप्रवेनन्तीनाभिसंदेनभुवनमभिवर्षन्तीसिंचन्तीकुञ्जमिवकूपप्राप्ती
नपस्याःसाक्षेत्रोऽधीकूपस्त्रक्षीवूमापीनमित्यमरः कूपस्रोनडिस्यनऊादेशाः वकुब्रीहिस्तूपसा
डीपिउडीप ८५

स्त्री

र.टी. १. रजइतिखुरोद्भूतैरंतिकात्समीपे गात्रंस्पृशद्भिः दूरांतिकार्थेभ्योद्वितीयाचेतिचकारात्पंचमी
रजसांकणैःमहीक्षितःपत्युर्नृपस्यादधानातस्यतीर्थाभिषेकेणजातातीर्थाभिषेकजांशुद्धिमा
दधानाकुर्वाणा एतेनवायव्यंस्नानमुक्तम् उक्तंचमनुनाआग्नेयंभस्मनास्नानं अवगाह्य

रजःकणैःखुरोद्धूतैःस्पृशद्भिर्गात्रमंतिकात् तीर्थाभिषेकजांशुद्धिमादधानामही
क्षितः ८६ कुलकं तांपुण्यदर्शनांहृष्टोनिमित्तज्ञस्तपोनिधिः याज्यमाशंसितावंध्यप्रा
र्थनंपुनरब्रवीत् ८७

तुवारुणम् आपोहिष्ठेतिचब्राह्मंवायव्यंगोरजःस्मृतमिति ८६ तामिति निमित्तज्ञःशकु
नज्ञःतपोनिधिःवसिष्ठःपुण्यंदर्शनंयस्यास्तांपुण्यदर्शनांदृष्ट्वाआशंसितंमनोरथं तंप्रत्यबंध्याअवि
फलःतदवंध्यंसफलंप्रार्थनंयस्यतंप्रार्थनीयमनोरथमित्यर्थः याजयितुंयोग्यंयाज्यंपार्थिवंपुन

59

रघु टी ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अहङ्करेति हे राजन् आत्मनः कार्यसंसिद्धिं अहङ्करवर्तिनो शीघ्रभाविनो विगणय्य विहाय यतः कारणात् कस्माणि मे गलन्मूर्तिः वह्न्यादिभ्य इवेतिऽपि उपयेतुः नास्तिकीर्तिनेवसमेवो

अहङ्करवर्तिनो सिद्धिं राजन् न विगणय्य आत्मनः उपस्थितैर्येकल्याणी नास्तिकीर्तिनेपवेयत् ८८ वसवह्निरिमोशाश्वदात्मानुगमनेन गो विघार्मभ्यसनेनेव प्रसाददयितुमर्हसि ८५

पस्थिता ८८ वसेति वने भवं वन्यं कंदमूलफलादिकं त्यक्त्वा निराहारो यस्मात् त्वया भूतः सन् इमो गो शाश्वत् सदा प्राप्रसादाद्विच्छेदेन समर्थः आत्मनस्त्वं कर्तुरनुगमनेनानुसरणे न विघामिव प्रसाददयितुं प्रसन्नो कर्तुमर्हसि ८५

॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. ३१ गवानुसरणप्रकारमाह प्रस्थितेति प्रस्थितायां प्रतिष्ठेथाः प्रयाहि समवप्रविभ्यः स्थ इ
त्यात्मनेपदम् स्थितायां निवृत्तगतिकायां स्थितिं कुरु निश्चेष्टः निषण्णायां उपवि

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः निषण्णायां निषीदास्यां पीताम्भसि
पिबेरपः ९० वधूर्भक्तिमती चैनामर्चितामा तपोवनात् प्रयाता प्रातरन्वेतु सायं प्र
त्युद्व्रजेदपि ९१

ष्टायां निषीदेः उपविश विध्यर्थे लोट् पीतमम्भो यया तस्यां पीताम्भसि तस्यां अपः पिबेः पिब ९०
वधूरिति वधूः जाया भक्तिमती सती गंधादिभिरर्चितां एनां गां प्रातः आतपोवनात् अन्वेतु अनुग
च्छतु आङ् मर्यादायां पदद्वयमेतत् सायमपि प्रत्युद्व्रजेत् प्रत्युद्गच्छेत् विध्यर्थे लिङ् ९१ ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुहीति इत्यनेन प्रकारेणातवमाप्रसादादाप्रसादपर्यंतम् आङ्. मर्यादाभिविध्योरितिसमासवैभाषिकत्वादस
मासत्वम् प्रसाः धेन्वा परिचर्याः प्रसुषापयेः भवनेनतवा विघ्नमस्तु विघ्नस्याभावोऽस्तु अव्ययं विभ
क्तीत्यादिना अर्थाभावे अव्ययीभावः पितेव धुरि पुत्रिणाम् सत्पुत्रवताम् प्रशंसायामिति निणिमत्व
पः धुर्यग्रे स्थेयाः तिष्ठेत्याशीरर्थे लिङ्. एलिङ्गोन्याकारस्यैकारादेशः त्वत्सदृशो भवस्तु पुत्रोऽस्तिवि

दुह्यतां प्रसादादाप्रसादात्त्वं परिचर्यापरो भव अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ९२ तथे
ति प्रतिजग्राह प्रीतिमान्सपरिग्रहः आदेशं देशकालज्ञः शिष्यः शासितुरानतः ९३

९२ तथेति देशकालज्ञो देशोऽग्निसंनिधिः कालोऽग्निहोत्रावसानसमयः विशिष्टदेशकालोऽत्यन्तमा
येकर्मस्नानमव्याहतमिति जानन् अत एव प्रीतिमान् शिष्याः अंतेवासी सन् छात्रांतेवासिनौ शिष्य
इत्यमरः सदाज्ञासपरिग्रहः सपत्नीकः पत्नीपरिजनादानमूलशाखापरिग्रहा इत्यमरः आन
तो विनयेनानम्रः सन् शासितुर्गुरोरादेशमाज्ञां तथेति प्रतिजग्राह स्वीचकार ९३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
३२

मृग्येति । अथ प्रदोषे दोषज्ञो विद्वान् विपश्चिद्दोषज्ञः सन्सुधीरित्यमरः । सूनृतवाक् सत्यप्रियवा
क् । प्रियं सत्यं च सूनृतमिति हलायुधः । स्रष्टुः सूनुः ब्रह्मपुत्रो मुनिः । अनेन प्राकृतकार्यं निर्वा
हकत्वं सूचयति । उदितश्रियं शयितो विशांपतिं मनुजेश्वरम् । द्वौ विशौ वैश्यमनुजावित्यमरः । संवेशाय
निद्रायै स्वापाद्विशे शयनं स्वापः स्वप्नः संवेश इत्यमरः । विससर्ज आज्ञापयामास ९४ तस्या

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं सूनुः सूनृतवाक्स्रष्टुर्विससर्जोदितश्रियं ९४ स
त्यामपि तपःसिद्धौ नियमापेक्षया मुनिः कल्पवित्कल्पयामास वन्यामेवास्य संविधां ९५

मिति । विकल्पवित् अतप्रयोगाभिज्ञो मुनिः तपःसिद्धौ सत्यामपि तपसैव राजयोग्याहारः संपाद
नसामर्थ्ये सत्यपीत्यर्थः । नियमापेक्षया तदा प्रभृत्येव व्रतचर्यापेक्षया अस्य राज्ञो वन्यामेव
संविधीयतेऽनेनेति संविधा प्रजुशादेशयनसामग्रीम् प्रातःस्वापसंगे इति कल्पतरुः । अक
रिचकारके संज्ञायामिति कर्मण्यङ् कल्पयामास संपादयामास ९५ ॥ ३२

63

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निर्दिष्टेति सराजाकुलपतिनामुनिकुलेश्वरेणवसिष्ठेननिर्दिष्टांपर्णशालामध्यास्याधिष्ठापत
स्यामधिष्ठानेकृतेस्वर्थैः अधिशीङ्स्थासामादिनाध्याधारस्यकर्मत्वेद्वितीया प्रयतोनियतःपरिग्रहःपत्नी
एवद्वितीयोयस्येतिसतथोक्तः कुशशयनेसंविष्टः सुप्तःसन् नस्यवसिष्ठस्यशिष्याणामध्ययनेन
अपररात्रेवेदपाठेननिवेदितमवसादने यस्यास्तांनिशांनिनायगमयामास अपररात्रावध्ययने

निर्दिष्टांकुलपतिनासंपर्णशालामध्यास्यप्रयतपरिग्रहद्वितीयः तच्छिष्याध्ययननि
वेदितावसानांसंविष्टःकुशशयनेनिशांनिनाय ९५ इतिश्रीरघुवंशेमहाकाव्येकालिदा
सकृतौवसिष्ठाश्रमगमनोनामप्रथमःसर्गः १

मनुः निशान्तेनपरिश्रान्तोब्रह्माधीत्यपुनःस्वपेत् नचापररात्रमधीत्यपुनः स्वपेदितिगौत
मस्यप्रहर्षिणीवृत्तमेतत् तदुक्तम् म्नौज्रौगस्त्रिदशयतिःप्रहर्षिणीयम् ९५ इतिश्रीम
होपाध्यायकोलचलमल्लिनाथसूरिविरचितायांरघुवंशसमाख्यायांसंजीविन्यांप्रथमःसर्गः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऋ.टी. ३३ ग्रामस्तु राशीभवदेगलीभाभावैदासीकृतनतुग्यस्तिधं मेदास्मिन्नेनिंदितशार्दें जुं वेदे रविंदानतु
तुदरीत्वा १ अयेति अग्ने ज्ञानपनानेनतरेयशोधनः प्रजानामधिपः प्रजेश्वरः प्रभाते प्रातः का
ले जायपास्त्वहस्तिगणमश्नतिग्रहणपिशाश्नतिग्रहणपिशाश्नतिग्राह्निति स्तोकारितेगंधमाल्ययाप्रा
तिग्राह्नियायेन्वासाश्नतिग्राह्नितगंधमाल्यानेनहयोक्तापीनपानमस्यास्तीति पीनः पीनवा
तिनर्थः मत्वर्थीयादिभ्योवरेत्यचप्रत्ययः पीनागोवाधेनुकाब्राह्मणाद्भुतिमहाभाष्यदर्शनात्

अयंप्रजानामधिपः प्रभातेजायाश्नतिग्राह्नितगंधमाल्यो वनायं पीनवतिवहत्वस्तोयशोध
नोयेनत्रमेषेत्विमोचे। पीनः प्रतिवहः वनसोयस्मालोकस्येषेयेनत्ववतायवनंगनस्तुसोच क्रियार्थे
पपदेस्मादिनावनर्थीज्ञात्वापदस्यमर्थानसुरातिलगायाः पुत्रनतयोगपत्वमनुसधेयं तथा
हिङ्कतिः पतिर्जायांप्रविशतिगर्भोभूत्वामातरंतस्यांपुनर्नवोभूत्वादशमेमासिजायतेतज्जाया
जायाभवतियदस्यांजायतेपुनर्दीतिपुत्रशोधनइत्यनेनपुत्रवताकीर्तितोभात्र राजानगरस्य
नोरत्वातिप्रवृत्तत्तिरामने ग्रामस्तगौवृतनपुत्रजातिः नलत्तगणप्रननतोदीरितलत्वमधो
जोपादोयदीयात्पुत्रजातयत्वाद्भुति ।। ३३

तस्या इति पांशवो रेणवो वा ग्रासो सतनीति पांसुलाः स्वैरिण्यः स्वैरिणी पांशुला च स्यादित्यमरः सिध्यादिभ्य 66
श्चेति लच्प्रत्ययः अपांशुलानां पतिव्रतानां धुरि अग्रे कीर्तनीया परिगणनीया मनुष्येश्वरस्य धर्मप
त्नी खुरन्यासैः पवित्राः पांशवो यस्य तं रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः इत्यमरः अत्र

तस्याः खुरन्यासपवित्रपांशुमपांशुलानां धुरि कीर्तनीया मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरि
वार्थं स्मृतिरन्वगच्छत् २

श्रुतिस्थायो श्रुतेरिवार्थमिति श्रुतेः तस्याः धेनोः मार्गं स्मृतिः मन्वादिवाक्यं श्रुतेः वेदवाक्यस्यार्थमभिधे
यमिवान्वगच्छत् अनुसृतवती यथा स्मृतिः श्रुतितुल्यमेवार्थमनुसरति तथा सापि गोखुर
न्यस्तमेव मार्गमनुससारेत्यर्थः धर्मपत्नी धर्मार्थं पत्नी अश्वघासादिवत्तादर्थ्ये षष्ठीसमासः प्रकृतिविकार
भावाभावात् पांशुलपदस्य निहतत्वेऽपि अपांशुलानामिति विरोधालंकारो ध्वन्यते २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निवर्त्येति दयालुः कारुणिकः स्याद्दयालुः कारुणिक इत्यमरः स्पृहगृहीत्यादिना आलुच् प्रत्य
यः यशोभिः सुरभिर्मनोज्ञः सुरभिः स्यान्मनोज्ञेऽपीति विश्वः स राजा दयितां निवर्त्य सौरभेयीं काम
धेनुसुतां नन्दिनीं धरन्तीति धराः पयांसि च पयसां धराः पयोधराः स्तनाः स्त्रीस्तनाब्दौ पयोधराः समुद्र

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः पयोधरी
भूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ३ ॥

विसमरः अपयोधराः पयोधराः संपद्यमानाः पयोधरीभूताः अभूततद्भावे च्विः कुगतिप्रादयइ
तिसमासः पयोधरीभूताश्चत्वारः समुद्राः यस्यास्तां अनेकमन्यपदार्थे इति अनेकपदग्रहणा
त्सामर्थ्यात्त्रिपदोऽपि बहुव्रीहिः गोरूपधरामुर्वीमिव जुगोपारक्षत्भारतणप्रयत्नेनैव रक्षतेति भावः ३ ३४

स्थितइति भूपतिस्तांगांस्थितांसतींस्थितःसन्स्थितिरहितोवस्यांप्रयातांप्रस्थितांउच्चलितःप्रस्थि
तःनिषेदुषींनिषण्णांउपविष्टामित्यर्थः आसनायांसत्वबन्धधीरःआसनिबद्धस्तत्परः उपवेशनमेवेति इः
र्थासनबन्धेउपवेशनेधीरःस्थिरःउपविष्टःसन्नित्यर्थःजलमाददानांपिबन्तींजलाभिलाषी।

स्थितःस्थितामुच्चलितःप्रयातांनिषेदुषीमासनबन्धधीरःजलाभिलाषीजलमाददानां
छायेवतांभूपतिरन्वगच्छत् ६ सव्यालविघ्नामपिराजलक्ष्मींतेजोविशेषानुमितांद
धानः आसीदनाविःकृतदानराजिरन्तर्मदावस्थइवद्विपेन्द्रः ७

पिबन्तीत्यर्थः इत्थंछायेवान्वगच्छदनुसृतवान् ६ सव्यालेति सव्यालानि परिहृता निर्विघ्नानि ह
श्वापदराशीतिपस्मात्तान्वपुंभूतामपितेजोविशेषेणप्रभातिशयेनअनुमितांसर्वथाराजाएवायं
भवेदिति ऊहितांराजलक्ष्मींदधानःअन्तर्लीनत्वेनविकृतदानराजिर्वहिरप्रकटितमदरेखोऽन्त
र्मदावस्थइतिअन्तर्गतमदावस्थायस्यसतथाभूतोद्विपेन्द्रइवासीत् ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. ६६

लतेति लतानां वल्लीनां प्रतानैः कुटिलतंतुभिरुद्ग्रथिताः ये केशास्तैरुपलक्षितः स्वयं भूतलतृणेतली
यास राज्ञाऽधिज्यमारोपितमौर्वीकधनुर्यस्य सोऽधिज्यधन्वा सन् धनुषश्चेत्यनङादेशः मुनिहोम
धेनोः रक्षापदेशात् रक्षणव्याजात् वन्यान् वने भवान् दुष्टसत्वान् दुष्टजंतून् दुष्टव्यालान् व्यवसायेषु स
त्वमस्त्री तु जंतुषु इत्यमरः विनेष्यन् शिक्षयिष्यन्निव दावं वनं विचचार वने च वनवह्नौ च दवो दा
व इत्यपि नियासवः वने च चारे मर्थः देशकालाध्वगंतव्याः कर्मसंज्ञा इत्यकर्मकाणामिति दावस्य

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्वि
नेष्यन्निव दुष्टसत्वान् ८ विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरया
मासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ९ कर्मत्वमिति दावस्य कर्मत्वं ८ विसृष्टेत्या

दि षड्भिः श्लोकैः तस्य महात्मनः महिमातिशयमाह मादयोऽपि राज्ञोपचारं चक्रुरित्यर्थः विसृष्टेति विसृ
ष्टाः पार्श्वानुचराः पार्श्ववर्तिनो जना येन तस्य पाशभृता वरुणेन समस्य तुल्यस्य अनेनानुभावः
सूचितः तस्य राज्ञः पार्श्वयोर्द्रुमाः उन्मदानामुत्कटमदानां वयसां खगानां खगबाल्यादिनो वयः
इत्यमरः विरावैरालोकशब्दमालोकस्य शब्दं वाचकमालोकशब्दं येनेति शब्दमित्यमरः उदीरयामासु

69 २

रघुवंशटीका ६६

मरुदिति मरुता प्रयुक्ताः वायुना प्रेरिताः बाललताः आरात् समीपे अभिवर्त्तमानम् आरात् दूरसमीप
योरित्यमरः मरुतो वायोः सखा मरुत्सखोऽग्निः तस्य आभा इव आभा यस्य तं मरुत्सखाभं ध्यातस्त्योपसर्गे कर्मणि
कथस्यः प्रसूनैस्त्वनैरल्लोपपत्तेः पुष्पैः पौरकन्याः पौराणां कन्याः आचारार्थैर्लाजैरिवावाकिर
न् नेत्रापतिविवत्सितवेन्यत्रलप्थः तत्रापि तत्रापमागतमपवरतीति भावः १० धनुर्भृत इति ध
नुर्भृतोप्यस्य तः एतेन भयशंकादर्शिता तथापि विशंकैः निर्भीतैरन्तःकरणैः कर्त्तृभिर्दया

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौ
रकन्याः १० धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशंकैः विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकामविस्तारफलं हरिण्यः ११

कृपया रसेनार्द्रो भावोऽभिप्रा योऽस्य तत् दयार्द्रभावं तदाख्यातमि
त्यर्थः भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वित्यमरः तथाविधं वपुर्विलोकयन्त्यो हरिण्यः
अक्ष्णां प्रकामविस्तारस्यात्यन्तविशालतायाः फलमापुः विमलकलत्रपीभवद्धचेतः क
थयमेवाहितैषिणीरिक्षवैतन्मायेनस्वांतःकरणहाति प्रमाणमादरेवम्नुधेरहमुतिस्मर्षाः ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. २२

स इति मारुतपूर्णरंध्रैः अतएव कूजद्भिः कीचकैः वेणुविशेषैः वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलो
द्धता इत्यमरः वंशः सुषिरवाद्यविशेषः वंशानां कृत्ये भृत्यत्वं पाते स्वरंशादु वाद्यविशेषे ज्ञानीयात्
वंशादिकं तु सुषिरमित्यमरः आपादितं संपादितं वंशस्य कृत्यं कार्यं यस्मिन् कर्मणि तत्तथा कुंजेषु लता
गृहेषु निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः वनदेवताभिः उद्गीयमानं उच्चैर्गीयमानं स्वं
स्वं यशः शुश्राव आकर्णितवान् १२ पृक्त इति गिरिषु निर्झराणां प्रवाहाणां प्रवाहो निर्झरो झर इत्यमरः

स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं
वनदेवताभिः ॥ १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांत
मनातपत्रमाचारपूतं पवनः सिषेवे १३

तुषारैः हिमसीकरैः तुषारो हिमसीकरः
इति विश्वः पृक्तः संपृक्तः अनीकहानां वृक्षाणां आकंपितानि ईषत्कंपितानि पुष्पाणि
तेषां गंधः सोऽस्यास्तीति तथोक्तः पुष्पगंधि ईषत्कंपितपुष्पगंधो वा न वेगितामंदः सु
रभिः पवनो वायुः अनातपत्रं व्रतार्थं परिहृतातपत्रं अत एवातपक्लांतं आचारपूतं तं नृप
सिषेवे आचारपूतत्वान्महाराज्ञागतस्य वनस्थस्यापि पवनस्सेवाप्यासीदिति भावः १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शशमेति गोप्तरि तस्मिन् राज्ञि वनं गाहमाने प्रविशति सति वृष्ट्यापि विना दवाग्निः शशाम फलानां
पुष्पाणां च वृद्धिः विशेषवती इति विशेषा अतिशयिता आसीत् कर्मार्थे चञ्प्रत्ययः सत्वेषु जंतु
षु मध्ये प्रनस्तूनं निर्बलं रक्षतीति सप्तमी अधिकः प्रबलः व्याघ्रादिः ऊनं दुर्बलं हरिणादिकं न बबा
धे १४ संचारेति पल्लवस्य रागो वर्णः पल्लवरागः रागोनुरक्तो मात्सर्ये केशादौ लोहितादि

शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको ब
बाधे तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निल
याय गंतुम् प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५

षिति प्रणाम्बतः सह्रवताम्र पल्लवरागताम्रा पतंगस्य सूर्यस्य प्रभा कांतिः प्रारदेशलभे शाले पतंगः
पक्षिसूर्ययोरिति विश्वः मुनेर्धेनुश्च दिगंतराणि दिशावकाशान् अन्तरमवकाशावधीसम
रः संचारेण पूतानि शुद्धानि कृत्वा दिनांते सायंकाले निलयाय स्थानाय धेनुपक्षे आलयाय च
गंतुं प्रचक्रमे १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ.टी.
९८

तामिति मध्यमलोकपालो भूपालो देवतानापि ज्ञातियोनां क्रियाः यागाख्या हव्यदानादिना तासेवार्थः प्र
योजनं येषा सा लोधेन तु मूलक च तु परसंयो अन्वगानं तु समनुपदं क्लीवमव्ययमित्यमरः सतां मतेन
सद्भिः मान्येन राजिवृद्धिः कृत्यादिना वर्तमानेन क्तः क्तस्य च वर्तमाने इति षष्ठी तेन राज्ञा उपपन्ना युक्ता
तायेतुः सतां मते नीतिविदां प्रशंसानेन उपपन्नासा तानि श्रमस्तान्या हान्यात्वकं तु दिवि वभौ १६
सपल्लवेति सराजापल्लवेभ्यः मलनलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहकाणि स्फुपानि कूला
नो देवतानापि ज्ञातियि क्रियार्थी मन्त्रापयौ मध्यमलोकपालः वभौ वस्तनेन सतां मतेन श्रद्धेव
साताद्दिवि विनोपपन्ना १६ सपल्लवानीति वराहप्रधानान्यावाहत्तो न्युरवर्हिणानि य
यो न्यगाध्यासितशाड्वलानि ... रूपामायमानानि वनानि यथन १७ नियेवुत्तानि व
र्हीण एवेषां सन्तीति वर्हिणो मयूराः मयूरो वर्हिणो वर्ही समरः फलवर्हिभ्यामिन् वक्तव्यः सावा
सेहत्तानिभ्रमन्तो वर्हिणो येषु तानि रूपामायमानानि वराहवर्हिणादिमन्ति निम्नाश्रयमानि
प्रमाणानि भवन्तीति यमामायमानानि वराहवर्हिणादिमन्ति निम्नायमानानि यमानि तु लोहिनादि
डाल्भ्यः क्यष्यतिक्य पञ्चलयः वाक्यषष्ठ्यामने पदेश्यानं च मरोगरध्यासिता शाड्वलानि यत्रानि
शादः शाष्याणे पु देशाषु सन्तीति शाड्वलाः शाष्य शामा देशाः शाड्वलः शादहरित इत्यमरः शादः क

१७

प्रथमपापमविश्वमविश्वप्रयमणी

एतान्युपर्युपरि शंकितानि दिः प्रतत्तमासीमुखपण्डितावे

९८

आपीनेति गृष्टिः सकृत्प्रसूता गौः गृष्टिः सकृत्प्रसूता गौरिति हलायुधः नरेंद्रो दिलीपो यथाक्रमं आ
पीनं ऊधः कुंडं ऊधस्तु क्लीबमापीनमित्यमरः आपीनभारोद्वहने प्रयत्नात् प्रयासात् वपुषो गुरु
त्वात् आधिक्याच्च अंचिताभ्यां चारुभ्यां गताभ्यां गमनाभ्यां तपोवनाद्व्यावृत्तेः पंथानं तपोवना
वृत्तिपथं अलंचक्रतुः यथासंख्यमित्यादिना कारकत्वेन यः समासो न अलंचक्रतुः भूषितवं

आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां तपो
वनावृत्तिपथं गताभ्यां १८ वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनांतात् पपौ
निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां १९

तौ १८ वसिष्ठेति वसिष्ठधेनोरनुयायिनं अनुचरं वनांतरादावर्तमानं प्रत्यागच्छंतं दिलीपं वनिता सु
दक्षिणा निमेषेष्वलसा मंदा पक्ष्मणां पंक्तिर्यस्याः सा निमेषालसपक्ष्मपंक्तिः सतीत्यर्थः लोचनाभ्यां करणाभ्यां उप
षिताभ्यामिवोपवासो भोजननिवृत्तिः तद्वद्भ्यामिव वसतेः कर्तरि क्तः पपौ पयोपायिताभिवृत्स्पृहयाज
लमधिकमपि वनितेदृशमधिकं स्पृहयायिकं विलोकयतीत्यर्थः १९ ॥ ॥

र·टी· पुरस्कृतेति वर्त्मनि पार्थिवेन दृष्टिपथाद्दूरे ईषद्दूरेण न सेश्वरत्वेन पुरस्कृता अग्रतः कृता धर्मस्य पत्नी ध
३५ मपत्नी धर्मार्थं पत्नी तस्याः मध्यमपदलोपी समासः पार्थिवस्य धर्मपत्न्या प्रत्युद्ग
ता धेनुः तदन्तरेण तयोरन्तरे मध्ये दिनक्षपयोर्दिनरात्र्योर्मध्यगता संध्या इव राज २० प्रदक्षिणी

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या तदंतरे सा विरराज धेनुर्दिन
क्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता
प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः २१

कृत्येति अक्षतानां पात्रेण सह वर्तमानं इति साक्षतपात्रं हस्ते यस्याः सा सुदक्षिणा पयस्विनीं
प्रशस्तक्षीरां धेनुं प्रदक्षिणीकृत्य प्रणम्य अस्याः धेन्वाः विशालं शृंगान्तरं शृंगमध्यं अर्थसिद्धे
द्वारमिव अनर्च पूजयामास अर्थसिद्धेर्द्वारमिवेत्यनेन भावि वादित्वालिङ्ग २१ ॥ ३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वत्सोत्सुकेति साधेनुर्वत्सोत्सुकापि वत्से उत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्य
ग्रहीत् इति हेतोः तौ दंपती ननंदतुः पूजास्वीकारस्य हेतुमाह भक्त्येति पूज्येषु अनुरागो भक्तिः तयोपप
पन्नेषु युक्तेषु पूज्येषु पूजनसाधनेषु विविधेषु विषयेषु तद्विधानां तत्साः धेनोः विधेव विधाप्रकारा
येषां ते येषां महतां साधूनामित्यर्थः प्रसादस्य चिह्नानि लिंगानि पूजास्वीकारादीनि पुरःफलानि परा

वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ भक्त्योपपन्नेषु हि तद्विधानां प्रसा
दचिह्नानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः दोहा
वसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां २३

गतानि प्रत्यासन्नानि फलानि येषां तानि
हि अविलंबितफलसूचकलिंगदर्शनादानंदो युक्त इत्यर्थः २२ गुरोरिति भुजोच्छिन्नरिपुर्दिलीपः
सदारस्य दारैः प्रकृत्यासहवर्तमानस्य गुरोरुभे पादौ पीडयित्वा ऊढ्वा विनीतसमरः पादौ निपीड्याभिवन्द्य
सांध्यं संध्यायां विहितं विधिमनुष्ठानं च समाप्य दोहावसाने निषण्णामासीनां दोग्ध्रीं दोहनवतीं तामे
वनान्निवृत्तत्वप्रत्ययः पुनर्भेजे सेवितवान् दोग्ध्रीमिति निरुपपदस्य
प्रयोगात् कामधेनुत्वं गम्यते २३ ॥ दारास्यान्नु ×३

र.टी.
४.

तामिति गोप्ता रक्षकः गृहिणीसहायः पत्नीद्वितीयः सन् उभावपीत्यर्थः अन्तिके न्यस्ताः बलयः प्रदी-
पाश्च यस्यास्तां न्यस्तबलिप्रदीपां तां धेनुमन्वास्य अनूपविश्य क्रमेण सुप्तामनु संविवेश सुप्तोत्था प्रा-
तः सुप्तोत्थितां अनूदतिष्ठत् उत्थितवान् अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते अ-
नेनाह धेनुव्यापारो राजव्यापारामिति अपौनरुक्त्यं कर्मप्रवचनीययुक्ते द्वितीया २४ इत्थमिति इत्थं

पा२

तामन्तिकेन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः क्रमेण सुप्तामनु संविवेश सुप्तो-
त्थितां प्रातरनूदतिष्ठत् २४ इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः सप्त व्य-
तीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य २५

अनेन प्रकारेण प्रजार्थं संतानाय महिष्या
सह समं अभिषिक्तपत्न्या सह कृताभिषेका महिषीत्यमरः व्रतं धारयतो महनीया पूज्या कीर्तिर्य-
स्य दीनानामुद्धरणे दीनोद्धरणे उचितस्य सत्त्वरजस्तमोगुणाः प्राहतया ये बाला विद्धिगुणानि
त्रिरावृत्तानि सप्त दिनानि एकविंशतिदिनानि व्यतीयुः २५ ॥ ॥ ४०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मन्येषुरिति मनेषु: मनुस्मिन्दिने द्वाविंशो दिने सद्य: पहन्यरेत्यादिनानिपातनाद् व्यपं प्रवाम्या ॥
याथ सर्वे ह्रीनादोह वैनरोपयान् तयाथ वाम्यामतनेरजयान सर्वेषुरादयस् इत्यमर: मुनिहोमे
येनुरात्मानुचरस्तन्यपस्य भावेष्वभिप्राये हट भक्तित्वम् भावोऽभिप्रायश्चाशय इत्यमर: जित्वा
समात्तानामिच्छति त्वाश्रुस्य हृयोसनरुत्यात्मनेपदे प्रानच प्रयतनत्वास्मिन्निति प्रयात: पतनस्त्र

मन्येषु केरां सानुचरस्य भावे जित्वा समानो मुनिहोम येनु: गंगाप्रपातांत विरूढ शष्पे गौरी
गुरोर्गह्वरमाविवेश २६ सोऽनु: प्रपर्यामन सा पितृस्हि सौरिसि दिपो भा श्रहिते त्वणेन अलक्षि
नाम्भुत्मनतोत्पेयस्यास्त सासिंह: किलेतो चकर्ष २७

देश: गंगाया: प्रपातस्तस्यान्ते समीपे निरू
ढानि शष्पाणि यस्मिन् शष्पं बालतृणं बालस्त्वित्यमर: गौरी गुरोर्गह्वरं पार्वती पितुर्गह्वरं गुहमा
विवेश २६ सेति सा पेतु: हिसै: व्याघ्रादिभिर्मनसापि ऋ: प्रपर्यां उपर्वैर्ति रश्मि शोभा यो श्रहिते त्वणे
नत्तत्त्वहिनान्येपश्लाति तनमत्सुत्मनमामिमुख्येनोस्मनेयसमसासिंह: तापेन्नुश्रतस्यह
ठात् प्रसह्यात्तु हठार्थकामित्यमर: चकर्षे किलेत्यलोके २७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रु. टी. ४१

तदीयमिति गुहानिबद्धप्रतिशब्देन प्रतिध्वनिना दीर्घं तस्या इदं तदीयं आक्रंदितं आर्त्तयोवनम् आ
र्त्तेषापन्नेषु साधोर्हितकारिणो नृपस्य नगेंद्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु किरणेषु वा हेसीत्य
मरः आदायेव गृहीत्वेव निवर्तयामास २८ स इति धनुर्द्धरः स नृपः पाटलायां रक्तवर्णायां गवि त
स्थिवांसं स्थितवन्तं क्वसुश्चेति क्वसुप्रत्ययः केशरिणं सिंहं सानुमतो इधोनेरविकसविकारो धातवस्त

तदीयमाक्रंदितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादाय नगेंद्रस
क्तां निवर्तयामास नृपस्य दृष्टिं २८ स पाटलायां गवि तस्थिवांसं धनुर्द्धरः केशरिणं
ददर्श अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् २९

यीनस्याम अधित्यकायां ऊर्ध्वभूमो उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः उपाधिभ्यां त्यक
न्नासन्नारूढयोरिति त्यकन्प्रत्ययः प्रफुल्लो विकसितः ञिफला विकसने इति धातोः पचाद्य
च् लोध्राख्यं द्रुममिव ददर्श प्रफुल्लमिति नकारपाठे ञिफला विशरणे इति धातोः कर्त
रि क्तः उत्परस्याइत्त्वकारादेशः २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततइति मृगेंद्रगामीसिंहगामी शरण्येरक्षणे शरणेगृहरक्षित्रोरित्यमरः शरणेरक्षणेगृहेइतिया
दवः शरणेसाधुः शरण्यः तत्रसाधुरितियत्प्रत्ययः प्रसभेनबलात्कारेण उद्धृताअरयोयेनसतथोक्तः इति
जाताभिषंगोजातपराभवःसन् अभिषंगोपराभवेप्युक्तमरः वध्यस्यवधार्हस्यदेशादिभ्योयतइ
तियत्प्रत्ययः मृगेंद्रस्यवधायनिषंगात् तूणीरात् तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोरित्यम

ततोमृगेंद्रस्यमृगेंद्रगामीवधायवध्यस्यशरंशरण्यः जाताभिषंगोनृपतिर्निषंगादुद्ध
र्त्तुमैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्यकरःप्रहर्त्तुर्नखप्रभाभूषितकंकपत्रे सक्तां
गुलिःसायकपुंखएवचित्रार्पितारंभइवावतस्थे ३१

रः उद्धर्त्तुमैच्छत् ३० वामेति प्रहर्त्तुस्तस्यवामेतरः दक्षिणःकरोनखप्रभिराभूषितानिवि
भूषितानिकंकस्यपक्षिविशेषस्यपत्राणियस्यतस्मिन् कंकःपक्षिविशेषस्यात् गृध्राकारेयुधिष्ठि
रेप्यूहितिविश्वः कंकस्तुकर्कटइतियादवः सायकस्यपुंखएव कर्त्तरियोकर्त्तर्योमूलप्रदेशःकर्त्त
रीपुंखइतियादवः सक्तांगुलिःसचित्रार्पितारंभःचित्रलेखितशरोद्धरणोद्योगइवावतस्थे ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
५५

बाह्विति बाह्वोः प्रतिष्टंभेन प्रतिबंधः प्रतिष्टंभ इत्यमरः विवृद्धरोषो राजा मंत्रौषधिभ्यां रुद्धवीर्यः प्रति 81
बद्धवीर्यः प्रतिबद्धशक्तिः भोगी सर्प इव भोगी राजभुजंगयोरिति शाश्वतः अभ्यर्णमासन्नं उपकंठां
तिकाभ्यर्णाभ्यग्राभ्यमितो प्यभितमित्यमरः मागस्कृतमपराधकारिणं अस्पृशद्भिः स्वतेजोभिरंतरदह्य
त प्रथितैर्नपाशस्त कुन्तजः आगात्मयस्यपीति पादपः ३२ तमिति निगृहीता पीडिता धेनुर्येन तस्तं
नः आर्यानं स्वतेरं रंतपप्रशांतमपरांत्वरिवा सायमस्तैश्च प्तेति वचनमनुवंशस्य केतुवध्याचने कोसिह

बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजा स्वतेजोभिरदह्यतांतर्भोगीव मं
त्रौषधिरुद्धवीर्यः ३२ तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं विस्मापयन्वि
स्मितमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः ३३

श्रवगुरुसत्वो महाबलस्तं आत्मनो वृत्तौ बाहुस्तंभरूपे व्यापारे विस्मितं सर्वेनाहि स्मितं कर्णारिकं:
नेहि लीलमनुष्यवाचा करणेन प्रतिविस्मापयन् विस्मयमाश्चर्यं प्रापयन्निजगाद सिंहः ईषदुन्नत स्तन
धातोर्णौ वृद्धौ आदेशे शात्प्रत्यये च सति विस्मापयन्निति रूपे सिद्धे विस्मापयन्निति पाठे तु पुगाग
मोऽवकाशो नास्ति स्मापयतेरिति केचित् तन्न मनाव विस्मापयामेव तिभीः स्मोर्हेतु भय इत्यात्मनेपदे विस्मापयमानि
इति स्यात् तस्मात् मनुष्यवाचा विस्मापयन्निति रूपसिद्धकरणविवक्षायां न कश्चिद्दोषः ३३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्तमिति हेमहीपाल तव श्रमेणालम् साध्याभावात् श्रमो न कर्तव्य इत्यर्थः अगम्यमानसाधनक्रि
यापेक्षया श्रमस्य करणत्वात् तृतीया उक्तं च न्यासोद्योते न केवलं श्रूयमाणैव क्रियानिमित्तं कार
णभावस्यापि तु हि गम्यमानापीति अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः इतः अ
स्मिन्मयि सार्वविभक्तिकस्तसिः प्रयुक्तमप्यस्त्रं वृथा स्यात् तथाहि पादपोन्मूलने शक्तिर्य
स्य न तत्तथोक्तम् मारुतस्य रंहो वेगः शिलोच्चये पर्वते न मूर्छति न प्रसरति २४ कैलासेति ।

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्छति मारुतस्य २४ कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रह
पूतपृष्ठं अवेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभमित्रं २५

कैलासवद्गौरं शुभ्रं वृषमारुरुक्षोरारोढुमिच्छोः चामीकरे शुभ्रे च गौरमारुणे पीतविषाणः इति शा
श्वतः स्वस्यापरिपदं निरूप्य वृषमारोहतीत्यर्थः अष्टौ मूर्तयो यस्य तस्याष्टमूर्तेः शिवस्य पादार्प
णमेवानुग्रहः प्रसादः तेन पूतं पृष्ठं यस्य तं तथोक्तं निकुंभमित्रं कुंभोदरं नाम किंकर
मां वेहि विद्धि पृथिवी सलिलं तेजो वायुराकाशमेव च सूर्याचंद्रमसौ सोमयाजी चेत्यष्टमूर्तय इति

82

रघु ५

र॰टी॰
५२

अमुमिति पुरः अग्रतो अमुं देवदारुं पश्यसि इति काकुः असौ देवदारुः वृषभो ध्वजे यस्य तेन पुत्रीकृतः
पुत्रत्वेन स्वीकृतः अभूततद्भावे च्विः यो देवदारुः स्कंदस्य मातुः गौर्याः हेम्नः कुंभ एव स्तन तस्मा
न्निःसृतानां पयसां अंबूनां रसज्ञः स्वादज्ञः हेमकुंभ इव स्तनेनेति विग्रहः पयः क्षीरपयोंबु

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन यो हेमकुंभस्तननिःसृतानां
स्कंदस्य मातुः पयसां रसज्ञः ३६ कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ३७ ॥

नेत्यमरः स्कंदसमानप्रेमास्पदमिति भावः ३६ कंडूयमानेति कदाचित् कटं कपोलं कंडूयमाने
न कर्षता कंड्वादिभ्यो यक् कृतनः शानच्च वन्यद्विपेनास्य देवदारोः त्वक् उन्मथिता अथाद्रेस्त
नया गौरी असुराणां अस्त्रैः आलीढं क्षतं सेनान्यं सेनापतिमिव स्कंदं पार्वतीमेदूरस्कंदः सेनानीत्यमरः ४३
सनस्तौ हि षण्मासान् दिनानि कपूतमिव एनं देवदारुं शुशोच ३७

ह्रिमूर्गीः ।

नीर नः२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेति तदा तत्कालवादिप्रभृति यस्मिन् कर्मणि तत्तथा तत्प्रभृत्येव वनद्विपानां श्वासांप्र
लम्भनाशिवेनोके समीपमागताः श्रान्ताः प्राणिनो वृत्तिर्यस्मिन् ततनः स्वंकः समीपउत्सवोसि 84

तदाप्रभृत्यैव वनद्विपानां श्वासायेमस्मिन्नर्मद्विजन्तो
आपादितः मूलभूतो विधाय सिंहत्वं मेकागानसत्व
हेतुः ९८

विद्वेस्थानाश्रयपयोरितिकेशवः सिंहत्वं विधायास्मिन्नद्विजन्तो गुहायोम्रहंव्यापा
दितोनिधुकः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नसेति परमेश्वरेण प्रदिष्टः निर्दिष्टः कालो भोजनवेला यस्याः सा उपस्थिता शाला प्रधानेन पाशो
इ.टी. गितात्यारणक्रधिरसव्रतानां भोजनं स्वरहिषो नाशो स्वंत्रुमसः इत्येवं इमसीस्वधेव त्वाधि
५४ वि नस्यमुत्विनस्य नसांगानसत्वहत्तेसमसिंहसन्नमे प्रत्नपर्याप्तनमस्वस्तीत्यादिनाचतु
र्थी २९ स्तुति स्पर्वउपायमस्यत्वलज्जां विहाय निवर्तस्व भवान् तं गुरोर्दर्शिनाप्रकाशि

नसाल्लमेषात्वरिनसन्नमे प्रदिष्टकाला परमेश्वरेण उपस्थिता शोणितपारणा
मेस्वरहिषुव्याइमसीस्वधेव १९ सतं निवर्तं त्वा विहाय लज्जां गुरौ भवान्दर्शितशिष्यभक्तिः
शास्त्रेणरक्षत्यपरणाकरतेननघशः शास्त्रमनोजतरेणाति ४

नाशिष्यकर्णेवाभान्ति ये न तत योक्ता सिनतु गुरुधनं विनाश्य कृयेन तत्समीपं गच्छेयमत
प्राहः शास्त्रेण तत्र रक्षा धनं शास्त्रेणाप्तु येन शास्त्रमाप्नुयल्लोरुपौरित्यमरः प्रशान्तोनिनदि
नालिसु कारत्नाय स्मात्दशाकारत्नं रातिनमशाकामितार्थः न तु दत्वे नत्वमपि शास्त्रमेतोऽयशो
नदिशोभानि नहिनास्मि प्रशान्तत्वाधैर्यप्रतिविधानं न दोषायेति भावः ४ ॥ ५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतीरिते वृकवाणमयिराज्ञो नृपश्नित्रुगलमंस्रमाधिराजस्य वचो निशम्य फ्नागीरिशासेस्वर
साशिवसप्रभावात् प्रसादतस्तः उत्थितास्तः तत मात्म निविषये प्रवज्ञाम पमाने शीघ्रिलि
चकार नसाजेसर्पः प्रवज्ञातो हमिति निवेदनं प्राप्येम्सर्थः समाने प्रवृत्तविया एणमभिमाने
नस वैम्ववरं प्रतीतिभावः ८१ प्रसं प्रसप्रवीचेति सपवहस्तेः प्रथमः स्तगः प्रति वंधोपस्तत्त्वस्ति
नतनत्र एवं वसंगे रभ्रप्रयोगे विनयात् प्रयत्नो विफलप्रयासो न पवज्रे ऽञ्जलिसावमुद्धनसकामेच्छ

इति त्रिगर्ताधिपराज्ञो ऽमरगाधिराजस्य वचो निशम्य प्रसादतस्तौ गिरिशप्रभावाद्
त्मनं वज्रं शिथिलीचकार ८१ प्रसप्रवीचे न मित्रप्रयोगे ततः सर्वं स्तं गे विनयप्रयत्नः
जडीकृतं स्यव कवीदितेन वज्रं मृत्तमिवं वज्रपाणिः ८२

न अंववकेलोचनेद्विरहफिनेवलोचनुवहनपनावकेत्तणन्नीतीतिहलाप्रुथः तत्रीएंव
कोनिघसनः अंववकोहरः नसवीतिनवीतएनजडीकृतः निबद्धीकृतः वज्रपाणेघसवज्र
पाणिरिदः प्रहरणार्थेस्थः परानिशासममोभवने: इति वक्रव्यामिनिपाणेः सप्रसनसोनरनिपातः
सद्भवास्थितोन्नृपाननिसिंहकम्पप्रवीत् बाहुसवज्रशक्रसक्तुरदस्मात्तमघवन्नेप्रभुरिति समरामारते ८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रु.टी.
४५

87

सेहद्वेति हेमदेगंरुसंतहद्वेचेष्टस्य ज्ञाति वहयापारस्य मन्मनहृचो वाक्यकामे हास्यं परिहसनीयम् य
हवचः स त्वं मदीये नेत्रार्द्धेकस्मन्हंविवृत्तः वक्तुमिच्छुरस्मि न हि नः स्त्रीस्यापनाभिन्नाशंकार्हं इत्य
र्थकिं करवान सर्वं ज्ञातवान्प्रति न हास्यमित्याह ये नेति एियतः प्राणभृतान्ये न गीते हृदते

सेहद्वचेष्टस्त्वमुरोगेऽङ्कामे हास्यं वचः पदं हंविवृत्तः ये
नगीतेप्राणभृताऽपि वेद सर्वं भवान्भावमतोऽभिधास्ये ४३

वाक्स्वत्यावहिरप्रकाशिनमेव सर्वं भावं वेदवेत्ति विदोलटो वेत्तिणल्लादेशः अतोऽहमभिधा
स्ये वक्ष्यामि वचज्ञाने प्रकृते कर्म संबध्यते अनेनाह गरवचनस्याकर्णप्रसंभाविताऽयमेनदि
त्युपसंहरति अतस्तु मौनमेव मम पत्राणं तेन वाङ्मनसयोरेकविषयप्रवादयमिति ज्ञानानाति ४५
त्यतोऽभिधास्ये यहचोऽहं विवक्षुरित्यर्थः ४३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

का५४५

मात्मरति प्रभवहारः प्रलयः स्थावराणां नकृमीलादीनां जंगमानां प्रतिशायेन गच्छतीति ते 88
गम्यते तेतिशापार्थपदप्रभवपयोगपदत्वकृपरि भाषानिमान पद योगाद्भिर्भावानोवश्यत्यप्र व
जंगमः मनुष्यादीनां सर्वेषां स्थितिप्रभवहारेषु हेतुः सर्वेश्वरो मम मम मायः एवं सः प्रलय
ग्रासनतद्भयर्थः शासनं चापिहतं प्रैगान सतत्वाति सुक्रूपम् नर्हिविहस्रगम्यतानतेमाह

मामेः सेमेस्थावरजंगमानां सर्गस्थितिप्रभवहारहेतुः गुरोरपीदंपदं मांहितानग्रेर्न
प्रणम्य रत्नाद्रपुपेतलीये ४४ सर्वेन्द्रियेनशरीरहृतिदेहेननिवेनेयितुप्रसीद हि
नावसानेनात्केवालवत्सांविबुध्यतायेर्यम हर्षैः ४५ गुरोरपीति गुरलाद्येनष
दिहमाहितानग्रेर्गुरोर्धनमपिगोद्वपमनुपेत्तेतीयम् ग्राहितानग्रेरितिविशेषेणानानुपत्ताक
रत्नानुविः सूत्राथनतंसत्वयति ४४ सर्वेति सर्वेन्द्रियागानसतत्वहृतिस्वमदीपेनदेहनशरीरस्य
हृतिजीवननिर्वर्तापितेवान्तेप्रसीदहिनावसानेऽनहुकोमानानममागमियनीस्तुकेठिता
वालवनतोपसासामहर्षैरियेनविहस्नेता ४५ ॥ ॥ ॥

र.टी.
४९

अथेति अथ भूतेश्वरस्य पार्श्ववर्ती अनुचरः सिंहः गिरिगह्वराणां गुहानां देवखातबिले गुह
गह्वरमित्यमरः अंधकारं ध्वांतं अंधकारोऽस्त्रियां ध्वांतं तमिस्रं तिमिरं तम इत्यमरः दंष्ट्रा
मयूखैः शकलानि खंडानि कुर्वन् भूयः किंचिद्विहस्य अर्थपतिं नृपं भूयः बभाषे हासकार
णं अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं इह द्रष्टव्यम् ४६ एकेति एकातपत्रं एक

अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् भूयः स भूतेश्वर
पार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६ एकातपत्रं जगतः प्रभु
त्वं नवं वयः कांतमिदं वपुश्च अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वं ४७

छत्रं जगतः प्रभुत्वं स्वामित्वं नवं वयो यौवनं इदं कांतं रम्यं वपुश्चेति एवं बहु त्याज्यं अल्पस्य हेतोर
ल्पेन कारणेनाल्पफलायेत्यर्थः षष्ठी हेतुप्रयोगे इति षष्ठी हातुं त्यक्तुमिच्छन् त्वं विचारे का
र्याकार्यविमर्शे मूढो मूढः प्रतिभासि प्रतीतो मूढ यथा ज्ञानमूर्खवैधेयबालिशा इत्यमरः ४७ ४९

नदिति नन्न स्मात्काव्यानतकल्याणपरंपरालंभोकारम् कर्मणिषष्ठी दुर्ज्जीवलमवस्याली
लीतिदुर्ज्जेवलेज्ञोनमिस्त्रेम्यादिनावल्लचेयसयोतोनिपातः प्रान्तदेहरवलणस्तुपेदम
प्रान्तदेहरवतोस्वगीतानित्सान्वेम्यादृ मलीनलेति अहेहतम्हेराज्ञमलीनलस्पर्शनमात्रेण
मूनलसंबंधमात्रेणमिन्नेपंइंइसंबोधियदस्थानमाऊः स्वर्गान्नाभिधतत्रस्तथंः ५॰ ननाम

नंइन्नोकल्याणपरंपरालंभोकारमूर्ज्जेस्वलमाम्नदेहं मलीनलस्पर्शनमात्रभिन्न
स्हदिशास्यपदमेइमाऊः ५॰ एतावद्रुक्काविरनेमरगोइश्वतिस्वेनेनोमग्रुणागतेनन शि
लोच्चयोपिहितिपालमुच्चैः श्रीमानमेवाण्यमभाषनेव ५८

२ रिति मृगेंइनावद्रुक्काविरनेमतिगुणागतेनास्यश्वतिस्वनेनशिलोच्चयः शैलोपिश्रीमानात्मे
वार्थ्यतितिपालेउच्चैरभाषत्तेवेडुस्येत्ता भाषिव्यंचुविमानार्थेवात् द्विकमकः श्रुविल्लद्विक
मकेष्वपठितः अतोविवक्षासिराकोनवचनत् सवनेतदुक्तं अकिं पाचिहृधिप्रश्निभिक्षिदीचिञाम्बप
योगनिमित्तकर्मविधौ श्रुविशासिलेनकथ्यते सचेतननरकीर्तितमाचारेनेकविनेम्यत्र ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
५८

निशम्येति देवानुचरस्य ईश्वरकिंकरस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरप्युवा 91
च किंभूतः सः तेन सिंहेनाध्यासितेत्याक्रमणम् नपुंसके भावे क्तः तेनाक्रमणेन कातरे
अक्षिणी यस्यास्तया बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् षिद्गौरादिभ्यश्चेति ङीष् किं

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्य
माणः सुतरां दयालुः ५२

वा वक्ष्यतीति भीतेव स्थिता इत्यर्थः धेन्वा निरीक्ष्यमाण एव सुतरां दयालुः सन् सुतरां इ
त्यत्र द्विवचनविभज्योपपदे त्यादिना सुशब्दात्तरप् किमेत्तिङव्ययघादित्यादिना आम्प्रत्ययः
तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा ५२ ॥ ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किन्तु वाचेत्स शाह तता न्‌ किलेति तत्‌ एवाहं सा पापमिति पातो: संपदादिनान्‌ । किं स गमादि
नामिति वक्तव्यादन्तु नास्ति केलोपेन गागनेवदितिन्‌ रूपसिद्धम्‌ ततो नाशाज्ञापनेति 92
तत्त्वम्‌ स्वपीति योगमन्तिभागान्‌ क: नामेनोक्षुमनिकाविरर्थैतो नक्रामति ततादिना

ततानु किल ज्ञापनं रुन्दद्य: तत्र स्पशाद्वोभुवनेश्रुतः रा
न किं नाहि परीत हुते: शालेरुपकोशमलीमसैवी ५३

दिताउग: उन्नत: तत्र स्वत्र वर्णस्य शब्दो वाचक: तत्र शब्द इत्यर्थ: सोयं तमात्तात्मा ज्ञा
पनेति क्षुनस्याभुवनेश्रुत: विलप्रसिद्द: स्वल्पवान्धकर्णादिवत्केवलत्रूत: किं तपकता
दिवत्‌ योगरूपमित्येष: ५३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र॰टी॰ ५४ अतः किमित्यत आह नस्वतन्त्रशास्त्रस्याविपरीतवृत्तेर्विरुद्धव्यापारस्य तत्त्राणमकर्त्तव्यं तु
सोऽराज्ञेत्यर्थः किं उपक्रोशं मलीमसैर्निंदां मलिनैः उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे
त्यमरः ज्योत्स्नावानमिस्रेत्यादिना मलीमसशब्दो निपातः नैवोल्लंघौ विक्रिं निंदितस्य सर्वं व्यर्थः
मित्यर्थः एतेनपकारान्तरसमितेत्यादिना ब्राह्मणकदयोः संशयकमिति निवेदितव्यं अथ कथं
चित्रकोतरमाह कथमिति चत्रुनयः कोपनपनयः कोपापनिवर्तनम् चकारो वाकारा

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् इमामनूनां सुरभेरवेहि रु
द्रौजसा तु प्रहृतं त्वयास्यां ५४

अर्थः महर्षेरनुनयो वान्यासांप
यस्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात् कथं नु शक्यो न शक्य इत्यर्थः अत्र हे
तुमाह इमां गां सुरभेः कामधेनोः पंचमी विभक्तिरिति पंचमी अनूनामन्यूनां अवेहि जा
नीहि न हि कथं त्वसा परिभवोऽदित्याह रुद्रेति अस्यां गवि त्वया कर्त्रा प्रहृतं तु प्रहारस्तु न
विसंवेदनाभावे क्तः रुद्रौजसा ईश्वरसामर्थ्येनेति तनवेत्यर्थः सत्यमभ्यधिकरणे चेति सप्तमी ५४ ५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नि
तर्हि किंचित्कीर्त्तनमित्यत आह सेव्यमिति सेव्यं गोमेधाख्यं क्रियते तत्समाक्रियते ग्रहेनेतिपरि 94
रटहीतमितिनिष्क्रयः व्रातेशीर्षकं परञ्जितिपरत्वप्रत्ययः सेवेहाद्यपेणमेवनिष्क्रयः
तेनभवत्तः त्वतः पेचम्यास्तसिल सोचर्यितेमाख्यानायोदनेपेनात्तुकेनर्थः धर्मेण्य

२
सैर्येस्वदेहार्पणनिः क्रयेणान्माख्यामयामोर्चयिते भवतः
नपारणसाहिहितानवैचमेवदंत्तस्वत्ततेः क्रियार्थः

र्येमाहितायत प्रत्ययः एवं सतितत्वपारणाभोजनं विहितानसात् मतेः क्रियाहे
मादिः सएवार्थः प्रयोजनं नसचात्वेशाभवेत स्वप्राणव्ययेनापिस्वामिगुरुयत्न
रक्षेत्युक्तिभावः ५५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी.
५०

प्रत्र भवान्नेवश्रमालमित्याह भवानिति परवान् स्वामिपरतंत्रः भवानपि दैवत्समाले
प्रवेतिवति परतंत्रः पराधीनः परवान्नाथवानपीत्यमरः भवताप्यनुभूयतएवेत्यर्थः
शेषंप्रथमइति प्रथमपुरुषः किमित्यत्राह हियस्माद्धेतो हिहेताववधारणइत्यमरः

भवानपीदंपरवानवैतिमहान्हियत्नः तवदेवदारौ स्या
तुंनियोक्तुंनहिशक्यमग्रेविनाश्यरक्ष्यंस्वयमक्षतेन ५६

तवदेवदारौविषयेमहान्यत्नः महत्तात्पर्यमित्यर्थः इदमशक्योक्तमर्थंदर्शयति ।
स्थातुमिति रक्ष्यंवस्तुविनाश्यविशेशागमुपादिनात्तपरतेनअक्षतेनदेहेनअक्षुकेनेति
शेषः नियोक्तुः स्वामिनोऽग्रेस्थातुमशक्यम् ५६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वथा चैतन्न दृश्यत इत्यर्थः इत्याह किमिति किं वा हन्ता वा हिंसोऽवध्यो मतश्चेत् तर्हि मे यशः एव
शरीरे तस्मिन् दयालुः कारुणिको भव स्वाहयालुः कारुणिकः कृपालुः सूरतः समाश्च
मरः ननु मत्स्यमत्पेत्यग्रन्थमशरीरे कोऽभिनिवेश इत्यत आह एकान्तेति मद्विधानामि

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः । एकान्त
विध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ५७

दृशानां विवेकिनां एकान्तविध्वंसिष्ववश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतविकारे
षु पिण्डेषु देहेषु यद्यपि गोलेवालेजसिद्धयोर्विनिहेमः पिण्डेषु देहेष्वनास्थानास्थास्यात्
लेवनास्था नयत्नापेता स कथ्यत इति विग्रहः ५७ ॥ ॥ ।

सोहमाहोरत्नुमनुस्मरणीयोस्मीत्याह संबंधमिति संबंधः सख्यं माभाषणमालापः पूर्वं का
रणेयस्मन्नमाऊः पूर्वेतरपूर्वेते प्रागपश्चीतिभेदेचेतिहैमः साराभाषणमालपः इत्यमरः
स्तताहकसंबंधः वनातिसंगतयोः नौसाववयोः इत्त्वः तन्तत्तोदुमतन्नायामुगशिवान्तचा
र. एतेनुतसमहदेतूव्यते मतनपवृत्तिनोमितुस्समेवगणयेपोवो वणयालसीरिश्रमयो
संबंधमाभाषणपूर्वमाऊर्जीतः संतौ अनतयोर्वताते नह तन्नायानुगन्नार्हसि तेसंबंधि
नोमेवगणयेविहन्तु ५८ तथेति गामुक्तवतेदिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः संन्यस्त
शस्त्रोहरयेस्वदेहमुपानयत्पिंडमिवामिषस्य ५९
चाशेमाणासूत्यमरः विहन्तेनार्हसि ५८
तथेति गामुक्तवते हरयेसिंहायकथयोसिंहत्त्वपर्णेचवर्णेविलोहरिविंडुरित्तिशाश्वतः स
न्तनप्रतिष्टंभात्प्रतिबंधात् विमुक्तोबाहुर्यस्य सः दिलीपः न्यस्तशस्त्रस्त्यक्तायुधः स
न्स्वदेहमामिषस्यमांसस्यपललंक्रव्यमामिषमित्यमरः पिंडंकवलमिवउपानयत् समर्पि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मिन्नलीति तस्मिन् तले उग्रसिंहनिपातं उत्पश्यतः उत्प्रेक्ष्यमाणस्य नर्कपतः ग्रवाहु.
मुखस्य प्रधोमुखस्य स्यात् वाहु. पयोमुखः उत्पमरः प्रजानां पालयितुः राज्ञः उपर्यु १८
परिष्टान् उपर्युपरि ष्टादिति निपातः विद्याधरालोके विशेषालोकाहत्सेः मुक्ता उष्ण

तस्मिन् तले पालयितुः प्रजानां उत्पश्यतः सिंहनिपातं उग्रं वाहुः मुखस्य सोपविष्ट
ष्णहस्ति पपात विद्याधरहस्तात् मुक्ता ६. उत्तिष्ठ वत्से मन्त्रताय मैनं वचो निशम्यो स्थि
तम् उत्थितः सन् ददर्श राजा जननीमिव सा गां मत्र नः प्रभवं गां न सिंहं ६१

हस्ति पपात ६. उत्तिष्ठेति राजन् मन्त्रमिव प्रावृत्तीति अमृतायमाने उपमानादावतरन्
निक्रम्य ततः शान्तं उत्थितं तु तत्र हैवतसोनिष्ठ इति वचो निशम्य कृतार्थ उत्थितः सन्
प्रसन्नः शान्तवनचरः प्रयतः प्रयतं तव ते निरस्य वोयस्मात् स्त्रां प्रसूतवनी गां स्त्रां जननीमिव
ददर्श न सिंहं न रदंष्ट्री ६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९९

र.टी.
५२

तमिति तेविस्मितमास्थं येगतं कर्त्तेरिक्तः तेद्विलीयेथेनुहत्वात किमित्स्वाह हेसाधोमाया
गुज्ञाप्यकलाविताभिहितोसि मयाज्ञत्विश्वभावान् मयि येन कोपि प्रमापिशाहत्तेनधर्मेन
समर्थः भ्रमोहित्वाचानकाः शराऊर्णाव कोहिवः इत्यमरः नमिकेपीत्यादिनाशत्यपः कि
मुनतमुत्तनरुपवक्तिया ज्ञवलवत सहकिमुनमसमनीवचानिभरउत्यमरः ९१ भक्तेति

तेविस्मितेयेतुहुंवावसाधोमापांमयोज्ञाख्यपरीतितोसि जरविश्वभावान मयित्तौन्नकोपि
प्रभुः शृहंतेकिंतुनोन्यहितः ९१ भक्तारोगुरोमयप्यः तुकेपपाचश्रीनासितेउत्रवरणेष्ठने टी२
केवलानोपपसांशहलिमेवहिमोकामउवोप्रसन्नाम ९२ हेउत्रगुरो भक्ताममयिश्रुतुके

पयाचनेन श्रेष्ठीनास्मि किंपाग्रहणमयिकर्तव्यमितिचतुर्थी वरदेवेभ्योवरणीयचतुर्थी दे
माहृतेवरश्रेष्ठेविशुद्धीवेमनाकृपिपमित्यमरः द्रुणाक्षरवीऊरु तथाहि सोकेवलानोप
पसांप्रहृतिकारणंनावेहि नविहिकिंतप्रसन्नाकामानरोगयेतिकामदुघानामवेहिउहस्येतिशेष ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततइति मानिनार्थी स्वहस्तार्जितः वीर इति शब्दो येन सः एतेनास्य दातृत्वं दैन्यराहित्यं चोक्तं
सराजा हस्तौ समानीय संधाय अंजलिं बध्वेत्यर्थः वंशस्य कर्त्तारं प्रवर्त्तयितारं अनंत 100
वरंतुकुलमिति शेषसिद्धिः एतेन कीर्त्तिस्थिरयशसं तनयं सुदक्षिणायां ययाचे ६४ संता

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः वंशस्य कर्त्तारमनंत
कीर्त्तिं सुदक्षिणायां तनयं ययाचे ६४ संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य प
यस्विनी सा दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ६५ ॥

तेति सा पयस्विनी गौः संतानं कामयतेऽसौ इति संतानकामः कर्मण्यण् तस्मै राज्ञे तथेति का
म्यतइति कामो वरः कर्मणि घञ् अन्वयः तथेति कामं प्रतिश्रुत्य हे पुत्र मदीयं पयः पत्रपु
टे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुंक्ष्व पिबेति उपभुंक्ष्वेति वा पाठः तमादिदेश आज्ञापितवती ६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वत्सेति हे मातः वत्सस्य वत्स सपीतस्य शेषं वत्सपीतावशिष्टमित्यर्थः होम एवार्थस्तस्य विधिर
र॰ टी॰ नुष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः तव ऊधसि भवं ऊधस्यं क्षीरम् शरीरावयवाच्चेति यत् उ
५२ भयः रक्षितायाः उर्व्याः षष्ठांशं षष्ठभागमिव ऋषेरनुज्ञामधिगम्य उपभोक्तुमिच्छामि ॥ ६६

वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः। ऊधस्यमिच्छामि तवोपभोक्तुं
षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा
बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ ६७

इत्थमिति इत्थं क्षितीशेन विज्ञापिता वसिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता संप्रत्यन
याप्रीततरा प्रीतिसेतस्याबभूव तदन्विता दिलीपेनान्विता हैमवतात् हिमवत्सम्बन्धिनः
कुक्षेः गुहायाः सकाशात् अश्रमेण अनायासेन आश्रमं प्रत्याययौ प्रत्यागता ॥ ५३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्याः इति प्रसन्नेन्दुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिह्नैर्मुखरागा-
द्यनुमितं अनूहितं तस्याः धेन्वाः प्रसादं अनुग्रहं हर्षचिह्नैर्विज्ञाततत्वात् पुनरुक्तयेव वाचा
गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै शशंस कथितस्यैव कथनं पुनरुक्तिः न चेह न दृष्टि-
किं तु चिह्नैः कथितस्य पुनः कथनात् पुनरुक्तप्रवाख्ये इव तयेत्युत्प्रेक्षा ६८ स इति अनिंदितात्मा

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ६८ स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सहुतावशेष
म् पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ६९

(गर्गीति सद्भावः

सत् सद्वत्सलः सन् प्रेमवान् सद्वत्सलः वत्सो साध्वी कामं वत्से ३ति लच् प्रत्ययः । वसिष्ठे-
न कृताभ्यनुज्ञः कृतानुमतिः सन् वत्सस्य हुतस्य चावशेषं पीनद्गुतान्तशोष्णं नंदिन्याः स्तन्य
क्षीरं शुभ्रं मूर्तं परिच्छिन्नं यशः इव अतितृष्णः सन् पपौ ६९ ॥नरथेन ॥स॥

॥ ॥ ॥ ः अनुहानः ३॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रातरिति वृषीवसिष्ठः प्रातर्यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोमत एवार्थं तत्स्यात्
ऋ.टी. त्मानस्याश्रितेषां स्यानिकं प्रस्थानेभवेननकालोचितमित्यर्थः सेनगरीरावृषवाद्वितियाधार
५४ क... मतुं पश्येन ...मर्थः

प्रातर्यथोक्तव्रतपारणांते प्रास्यानिकं स्वलयनेश्रयुक्त तौ रे
पतौ स्वां प्रातेरा जयातेो प्रस्यापयामासत वृषीवासिष्ठः १०

कथा कश्चैवि तत्र गणाह
त्यपिकालेवर्तमानतातश्रमपत्रुष्यतःश्निहृतिकारः ईयते प्राप्यतेनेनेति प्रयनं स्वल
पनेश्रमावर्कं प्राप्तो चोदयं प्रश्नेतोदपतौ स्वां राजयातेो वृषीप्रति प्रस्थापयाः

प्रदक्षिणीति त्वपङ्क्तेनगैतमश्यातीतिङ्कतोयोग्निः कर्मणा तेमर्त्तसुनेरनेतरम् दक्षिणा
नेनरमिमर्थः अहं धंतीव येनुसवत्सोचङ्ग दक्षिणी कृत्य प्रागतो दक्षिणेशद्दक्षिणे
तिष्ठन्तु रुशमतीनिचेसव्ययीभावः ननः ह्निः अश दक्षिणं प्रदक्षिणेसपद्यमानकृता 104
प्रदक्षिणी कृत्यसह्निर्मगलैः प्रदक्षिणादिभिः मगलाचारैः उदग्रनरपभावः सन्नेश
प्रदक्षिणीकृत्यकृतेङ्कताशमनेनतरेभूर्हैरंधंतीव धेनुसवत्सां चत्पः शतस्येसन्मंगलो
दग्रनरपभावः ॥ ओरामिरामधुनिनारथेन सधर्मपत्नीसहितःसहिस्त्वः पयोवनु
ह्वानसखेनमार्गे स्वनेवहर्षेणनमनोरथेन ॥२॥
नस्य ॥ ओवेति धर्मपत्नीसहितःस
हिस्त्वः वनादि ङः स्वसहनशीलः सन्तपः ओरादिभिरामधुनिनाकर्णरूढकरस्वनेनमा
र्गेष्वनुह्वानः पाषाणादिप्रतिवानरहितः अनपवर्गस्वपतोनिसुरस्तेनरथेनसेनहर्षेणनस
कलमनोरथेनेवमार्गमवधानेवथो मनोरथपथेध्वनिः ध्वनिः अनुह्वानः प्रतिवेधं
निवृत्तिः ॥२॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

105

र.टी. ५५

नमिति यद्दर्शनेन प्रवासनिमित्तेन नाहितो न लक्ष्मं जनितं दर्शनेन तत्कं ष्टं प्रजायैन प्रनेन निधमे
नुकर्षिते क्लृषीकृते श्रीगपस्मतं नेन वोरचैन वाम्बु दर्यं प्रजास्तत्रिमनानुवद्धिरत्निंस्वधनेषे:
प्रौषधीनां नानायसोमलिवपुषः अमावस्यापादद्दश्यति निवर्षः वेदपन्ते यद्दर्शने कलातेपनिमि:
ते प्रजायैलोकहितार्थं व्रतं देवताभ्यः कलासां नांन् चमः नेचसोमपपुर्देवाःपर्यायेणानुदृश्य
नेमी हितेलक्ष्मदर्शनेन प्रजाः प्रजाये प्रतकर्षितां ते चेषैः पपुस्त्रिमनानुवद्धिर्नवो
दयन्त्रायेमिवौषधीनां १३ पुरंदरश्रीः पुरमुत्पनाकं प्रविश्यपौरैरभिनंद्यमानः भुजेभुज
गेंद्रसमानसारेभूयः स भूमेर्धुरमाससंज १४ शङ्खनिष्वानः उदयस्याविर्भावोमनसमानम् १३
पुरंदरेति पुरः पुरीस्वराज्यं दारयतीतिपुरंदरः शक्रः सःस्वर्वधोरीरिस्कृतोरिति सर्वथा प्रसय: वाचे
यमपुरंदरौचेतेपुगागमनिपातः नसभश्रीरिवश्रीर्यस्य सन्नृपः पौरैरभिनंद्यमानः उपसतानु
क्षितध्वजम् पनाकं वैजयंती ताभिलक्ष्यं ध्वजमालिधितमन्नरः पुरंयावश्यमुजे गेंद्रसमानसा
रेतुल्यवलेस्थिरांशेवमायक्ष्यतौवेवरोंश्चिमनरः भुजेभूयाभूमेधुरमाससंजन्यर्पितवान् १४ ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथेति अथ द्यौः सुरवर्त्म द्यौः स्वर्गसुरवर्त्मनोरितिविश्वः अत्रेर्महर्षेर्नयनात्समुत्थं उत्पन्नं उत्पन्नं यथा स्यात
त् ज्ञानस्तोपसर्गोद्भृतिकर्तृव्ययः तत् ज्योतिरिव चन्द्रमिवेत्यर्थः अत्रेस्तेशाः स्मादत्रिनेत्रसमुत्थमिति ह
लायुः चंद्रस्यात्रिनेत्रोद्भूतत्वे उक्तं हरिवंशे नेत्राभ्यां वारि सुस्राव दशधा द्योतयन्दिशः तं गर्भं दशधा दृष्ट्वा
दिशो दिव्या दधुस्तदा समेत्य धारयामासुर्न चैनं समशक्नुवन् ततो भः सहसैवाथ दिशः दिशः ग

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं नरपतिकुलभू
त्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ७५ इति श्रीरघुवंशे महाका
व्ये कालिदासकृतौ दिलीपवरलाभो नाम द्वितीयः सर्गः २

भैः प्रभाविताः २ यथा नभावयन्तलोकान् शीतांशुः सुरभावन इति सुरसरित् गंगा वह्निना निष्ठ्यूतं नि
क्षिप्तं ऐशं छेतोः ष्ठिवु निरसने केचेत्य नेन निष्ठ्यूतं निष्ठ्यूते तनोर्वकारस्य ऊठ् तनुञात्तनिष्ठ्यूतं विहितमिति
समाहृतमरः ऐशं तेजः स्कंदमिव अत्र रुद्रामायणे गौरीपर्वत रामकेवलया तमेतत् प्रतिभूपोजयो
जयामासुः पुत्रार्थस॥ ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वैदेवताः देवकार्यमिदं देवसमाधत्त स्कन्दनाशान् प्रोलब्धुमग्नौ महत्तेजो गंगायां तेजस्तत्र नसुरजः २ देव 107
तानां वनितेव्यायगंगामध्ये साया वकः गर्भधारणे देवी देवतानामिदं प्रियं १ प्रसन्नतद्वचनं श्रुत्वा दि
वो रूपमुधारयत् ततसामहिमोद्दृष्टासमेनादेवकी च समन्ततः सरोदेवी समभ्यासं च पाव
कः सर्वश्रेष्ठो नास्ति हरणीनिगेणा धारघुनंदनेति राज्ञा सुदक्षिणा नरपेन दिलीपस्य कुलमभ्युन्ने
सततिलक्षणाय गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिर्भिन्नित्विष्टमनुप्रविष्ट
गर्भमाधत्त स्यावित्यर्थः अत्र मनुः अष्टानां लोकपालानामनुभावैस्तेजोभिर्निर्मितं निष्ठ ।
गर्भस्त्री वदुधीरयतेन तत्प्रभृति अत्र धृते तस्मिन्नेनस्त्रीकृतं धारणमात्रमुच्यते तथा मंत्रवर्णेष्व
तेपर्यं पुरयो पृथिवीमहतानागर्भमादध्येयं वं तं गर्भमाधेहि दशमे मासि सूतवे इत्यादिस्वलाय
नानां सीमंतमंत्रेनस्त्रीणां धारणे धारणे व्याख्यानशास्त्रप्रयोगदर्शनादिति मालिनीवृत्तमेतत
त् तदुक्तं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् इति श्रीपदवाक्यप्रमाण
पारावारीणकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां संजीविन्याख्यायां द्वितीयः सर्गः समाप्तः
२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उपायिगम्योप्यनुपायिगम्यः समावलोक्योप्यसमावलोक्यः भवोपियोभूदभवः शिवोयेजगतापायादपिनः

स्तपायात् । राज्ञीगर्भमाधत्तेत्युक्तं संप्रतिगर्भलक्षणानि वर्णयिष्यन् प्रस्तौति अथेप्सितमिति अथगर्भधारणा 108

नंतरं सुदक्षिणा उपस्थितोदयं प्राप्तकालम् भर्तुर्दिलीपस्येप्सितं मनोरथं भावेकः पुनः सखीजनस्योद्वी

क्षणानामुद्वीक्षणानां कौमुदीमुखं चंद्रिकाप्रादुर्भावम् यद्वा कौमुदीदीपोत्सवतिथिः ननु केमप्यमाननेरकौ

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं निदानमिक्ष्वाकुकुलस्य संतते

सुदक्षिणा दौहृदलक्षणं दधौ १

मोदत्नुनेत्रजनेजननापसत्तेनेनासौ कौमुदीमहमितिपाठे पठे. इ

ऋजुल, नेति नस्याः प्रत्यंशारंभः मूतपवकेचित् कौमुदीमहमितिपाठं पठंति इक्ष्वाकुकुलस्य संतते

नेरविच्छेदस्य निदानं मूलकारणं निदानं त्वादिकारणमित्यमरः एवंविधं दौहृदलक्षणं गर्भचिह्नं

लक्षणं दधौ हृदयेन गर्भहृदयेन च द्विहृदया गर्भिणी यथाहवाग्भटः मातृजं चास्य हृदयं मा

तुश्च हृदयेन तत् संबध्यते गर्भिण्याः श्रद्धाभिमाननामिति ननसेवेधिनाहमो हृदयमित्युच्यते सः चतो

र.टी.
५१

ईदृशीति तद्रूकेसंग्रहे द्विहृदयानारीदौहृदिनीमाननुगृति प्रदौहृदलक्षणसोक्षितद्वेनकौ
मुद्रीमुखत्वेनवनितरूपणान्तरूपकालंकारः अस्मिन्नसर्गेवंशस्थवृत्तम् जनौतवंशस्थमुदी
रितंजरो १ संप्रतिज्ञामतांस्त्वगर्भलक्षणंवर्णयति शरीरेति शरीरस्यसादात्कार्श्या
त् असमग्रभूषणापरिमितामरणालोध्रपुष्पवत् पांडुनाप्रखेनोपलक्षितानुसुदक्षिणा

शारीरसादादसमग्रभूषणामुखेनसालक्ष्यतलोध्रपांडुना
तनुप्रकाशेनविचेयतारकाप्रभातकल्पाशशिनेवशर्वरी २

विचेया: मृग्या: तारकाः यस्यांसातथोक्ताविरलनक्षत्रेत्यर्थः तनुप्रकाशेनाल्पकांतिनाशशि
नोपलक्षिताप्रभातकल्पाप्रभातादीषन्न्यूना समाप्रभातमित्यादिषाकृतकल्पप्रत्यय
मानशद्वस्यवुवद्भावः शर्वरीरात्रिरिवालक्ष्यतशरीरसादादिगर्भलक्षणमाह वहुलं ता
मतागारमाकृतेमृच्छांकादिरसेचकंजनमाप्रसेकः स्यदनेनमराज्या: प्रकाशनमिति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदिति त्वितीश्वरो रहस्सि मन्तुरभिमृदास्तुरभिस्तुरंगपिनस्याः आननेनदाननेस्तुहस्तिएणसुखेऽ
पाद्माय त्वस्मिन्नआयपौकाः कामिवसुविव्यापायेग्रीष्मावसानेसुवि: सुद्देऽस्तुपहस्तेनसंगताः सुखा
यो:स्तिते ग्रीष्मे हृतवेहपि साडुपाधासुदृमेत्रिएणीतिविप्य: पयोमुचामेचानोदृषैनैविदु 110

तदाननं सुस्तुरभिरिति नीश्वरो रहस्सु पाद्मायनत्वस्मिन्नाय पौ
करीवसिकेदृषनैः पयोमुचैःसुचिव्यापायेवनराजिपल्ललमं १

भि: दृषंनिविडदृष्वनाद्यमर: स्तिकं उदितेवनराजाएल्लसुपाद्मायकरीवगजस्वस्त्रवकरिव
नराजिपल्लवलानांकोनकामिनीवदनसमापिरनुसंधेय: गर्भिएणीनामृदहृतएलोकेप्रसि
द्धमेव पतेनदोहदाख्यगर्भलक्षणसुच्यते २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. ५८ दोहदलक्षणमस्यद्दलक्षणे हेतुं नरसुत्वेनत्वाने दिवमिति हि यस्मात् दिगन्तविश्रान्तरथः स्व ।।।
चक्रवर्ती तस्याः सुतनलत सुतो मरुत्वानिन्द्रः इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासन इ
त्यमरः दिवं स्वर्गमिव भुवं भोक्ष्यते भुजोऽवने इत्यात्मनेपदं अतः प्रथमे साव दलक्षणे

दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः
अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ४

तथाविधे भूवि
कारे स्वरूपेऽभिलषणं तदभिलाषो भोग्यवस्तु तस्मिन्कर्मणि च घञ्प्रत्ययः रसं तेसा
येन इति रसाः भोग्यार्थाः अन्ये च ते रसाश्च तान् विलङ्घ्य विहाय मनो बबन्ध यदासावि
र्थः दोहदहेतुकस्य स्पृहालक्षणस्य भोगस्पृहचनार्थं तमन्यमेत्तने ४ ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नमेइति मगधस्यराज्ञोपत्यंस्त्रीमागधीसुदक्षिणा द्वाञ्मगधकलिंगसूरमसादण्इत्यण्
ह्रियाकिंचिदीप्सितंकिमपिईप्सितंइष्टंमेमह्यंनशंसतिनदुःखेमेमह्यंनशंसति नचक्षे केषुवस्तुषुस्पृहा
वतीत्यनुवेलमनुक्षणमादृतः आदृतवान् कर्त्तरिक्तः आदृतोसादरार्चितावित्यमरः प्रियायाः

नमेह्रियाशंसतिकिंचिदीप्सितंस्पृहावतीवस्तुषुकेषु
मागधी इतिस्मपृच्छत्यनुवेलमादृतः प्रिया
सखीरुत्तरकोशलेश्वरः ५

सखीः सहचरीः उत्तरकोशलेश्वरोदिलीपः पृच्छतिस्म पप्रच्छलट्स्मेभूतार्थेलट्स्मेत्यने
नसखीनांविश्रम्भभूमित्वादितिभावः ५ श्रीरामरघुवररामरघुवररामरघुवररा

112

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र.टी. ५८

113

उपेत्येति दोहदं गर्भिणीमनोरथं दोहदं दौहृदं श्रद्धा लालसं च समं स्मृतमिति हलायुधः सा
सूचयति याः दोहदेन गर्भिणीमनोरथेन दुःखशीलता दुःखस्वभावता उपेत्य प्राप्य यद्वस्तु व
वैरूप्याच कौशल्येन दोहदं श्रानीतं भर्त्रेति शेषः तद्वस्तु सा अपश्यदेवालभतेत्यर्थः कुतः क्षितिपस्या
त्रस्य भूपतेरिष्टं वस्तु त्रिदिवेऽप्यनासाद्यं प्रनवाप्यं नाभूत् किं पार्थिवानां त्वाह अधिज्यधं

उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् । न
हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥ ६ ॥

न्वन इति नहि वीरपत्नीनामलभ्यं नाम किंचिदस्तीति भावः अत्र वाग्भटः पादृशो भाविदो
हृदाने श्रद्धा च विविधा नामिकेति यत्नं च पत्नीमनोरथपूर्तिकरणे दृष्टदोषसम्भवात् नहुरा
त्तः स्त्रीलौल्यात् तदुक्तम् देयमप्यहितं तस्यै हितं याहितमल्पकं श्रद्धाविघातेन गर्भस्य वि
कृतिश्च्युतिरेव च अन्यत्र च दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयादिति ॥ ६ ॥

५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्रमेणेति सास्वदृत्तिणा क्रमेण दोहदव्ययोश्च निलीयं प्रचीयमानावयवा पुष्यमाणावयवा सती भुवनाप
ञागमात्वाशात् तेन रसेन तद्धासंजाता मनोज्ञाः पल्लवा यस्याः सा लतेव राज ७ लक्षणा तेन दुर्वर्ण
यति दिनेष्विति तेषु दोहददिनेषु गच्छत्सु नितान्तपीवरमतिस्थूलमासमंततान् नीलेमुखे चुकेय

क्रमेण निलीयं च दोहदव्ययोश्चीयमानावयवा राजसा भुवनप्रज्ञापगमादनेनवेलेने
वसन्नद्धमनोज्ञपल्लवा ७ दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयं
तिरश्चकार भ्रमरावलीढयोः सुजातयोः पंकजकोशयोः श्रियम् ८

स्य तत्तदीयं स्तनद्वयं भ्रमरैरभिलीढयोः अभिव्याप्तयोः सुजातयोः सुंदरयोः पंकजकोशयोः प
द्मकोशयोः श्रियं तिरश्चकार अत्रवाहतुः श्लिष्टनाम्नोर्मध्ये नाम्नो ह्रस्व चुकोद्गति ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

